अर्थः— जो वस्तु खाई जा सके और खाने पर भली—भाँति पच सके और पच जाने पर हितकारक हो ऐश्वर्य की इच्छा करने वाले व्यक्ति को वही वस्तु खानी चाहिए।

6. अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः।

सारन्ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाऽम्बुमध्यात्।।

अर्थः– शास्त्र का पार कहीं निश्चित नहीं है और मनुष्य की आयु कम है इसलिए सार ग्रहण कर सार हीन को उसी प्रकार छोड़ देना चाहिए, जिस प्रकार हंस जल से दूध ग्रहण कर लेते हैं और जल छोड़ देते हैं।

7. शस्त्रहता न हि हता रिपवो भवन्ति, प्रज्ञाहतास्तुरिपवः सुहता भवन्ति।

शस्त्रं निहन्ति पुरुषस्य शरीरमेकं प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति।।

अर्थः– शस्त्रों से मारे गये शत्रु नहीं मरते परन्तु बुद्धि से मारे गये शस्त्रु वास्तव में मारे जाते हैं। शस्त्र से तो शत्रु का मरकर मात्र शरीर ही नष्ट किया जा सकता है परन्तु बुद्धि से उसका वंश कुल, वैभव और यश आदि सब कुछ नष्ट हो जाता है।

8. दिनान्ते पिबेत् दुग्धम्, निशान्ते च पिबेत् पयः।

भोजनान्ते पिबेत् तक्रम् किं वैद्यस्य प्रयोजनम्।।

अर्थः– दिवस के अंत (शाम) में दूध पीना चाहिए, रात्रि के अंत में (सुबह) जल पीना चाहिए, भोजन के अंत में छाछ पीनी चाहिए। ऐसा करने से वैद्य की आवश्यकता नहीं है।

9. आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।

कालेन पादमादत्ते पादं सब्रह्मचारिभिः।।

अर्थः– शिष्य अपने जीवन का एक भाग अपने आचार्य से सीखता है, एक भाग अपनी बुद्धि से सीखता है एक भाग समय से सीखता है तथा एक भाग वह अपने सहपाठियों से सीखता है।

10. नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।

नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्।।

अर्थः– विद्या के समान आँख नहीं है, सत्य के समान तप नहीं है, राग के समान दुःख नहीं है, और त्याग के समान कोई सुख नहीं है।

## शब्दार्था:

| | | |
|---|---|---|
| पुरा प्रोक्ता: | = | पहले कही गयी। ( पुरा–अव्यय शब्द) |
| महर्षिभि: | = | महान् ऋषियों के द्वारा (महर्षिभि:–महर्षि इकारान्त पु. शब्द तृ.ब.व) |
| निधये | = | खजाने के लिए ( निधि – इकारान्त पु. चतुर्थी एकवचन ) |
| सेव्यम् | = | सेवा करने योग्य |
| शोधका: | = | शुद्ध करने वाले हैं। (शोधक – प्रथमः बहुवचन) |
| अपहारका: | = | दूर भगाने वाले हैं |
| हितावहम् | = | हितकारी |
| त्वक् | = | त्वचा छाल |
| प्रत्यङ्गै: | = | सम्पूर्ण अङ्गों से (प्रति + अङ्ग = तृ.ब.व ) |
| सद्भि: | = | सज्जनों से (सद् – तृ.ब.व ) |
| सङ्गिना | = | संग वाले से ( सङ्गिन् – तृ. एकवचन ) |
| गम्यते | = | समझा जाता है। ( गम् (कर्मणि) – आत्मनेपद प्र.पु. एकवचन ) |
| वैद्य: | = | चिकित्सक ( पु. प्र. एकवचन) |
| नापित: | = | नाई ( पु. प्र. एकवचन ) |
| हन्तृणाम् | = | हत्यारों के ( हन्+तृच्=हन्तृ षष्ठी ब.व.) |
| हस्तेषु | = | हाथों में ( हस्त शब्द पु. सप्तमी ब.व.) |
| शस्त्रहता: | = | शस्त्रों से मारे गए। (शस्त्रहता: = शस्त्र + हन् + क्त ब.व. ) |
| प्रज्ञाहता: | = | बुद्धि से मारे गए। (प्रज्ञाहता: = प्र + ज्ञा + हन् + क्त ब.व. ) |
| सुहता: | = | भली प्रकार मारे जाते हैं। (सुहता: = सु + हन् + क्त ब.व. ) |
| दिनान्ते | = | दिन के अंत में (शाम) (दिन + अन्ते =दिनान्ते दीर्घ स्वर संधि ) |
| पय: | = | जल |
| प्रयोजनम् | = | आशय, उद्देश्य |

| | | |
|---|---|---|
| पादम् | = | चतुर्थ भाग |
| स्वमेधया | = | अपनी बुद्धि से (स्वमेधा – तृतीया एकवचन स्त्रीलिङ्ग) |
| सब्रह्मचारिभिः | = | अपने सहपाठियों के साथ। ( सब्रह्मचारिन् – तृतीया ब.व.पु.) |
| रागसमम् | = | लोलुपता के समान |

## अभ्यासः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–

(क) संस्कृतं कीदृशम् अस्ति?

(ख) संस्कृतमहर्षिभिः किं प्रोक्तम्?

(ग) वृक्षाः केषां शोधकाः?

(घ) के रोगाणाम् अपहारकाः?

(ङ) वृक्षाः प्राणिनां कथं उपकुर्वन्ति?

2. रेखाङ्कित–पदानि आधृत्य संधिविच्छेदं कुरुत –

(क) महर्षिभिः सर्वाविद्याः प्रोक्ताः।

(ख) तथायुर्बहवश्च विध्नाः।

(ग) पयः निशान्ते पिबेत्।

(घ) शस्तं ग्रसितुं यच्छक्यम्।

3. एषु शब्देषु को भिन्नः

(क) संस्कृते, गम्यते, क्रियते, दृश्यते।

(ख) क्रीडति, धावति, पिबति, ददति।

(ग) पठन्ति, चलन्ति, धावन्ती, हसन्ति।

(घ) वर्धमान, वर्तमान,सेवमान,शक्तिमान।

**4. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

आचार्यत्पादमादते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः।।

1. कस्मात् पादम् आदत्ते?
2. कः ब्रह्मचारिभिः पादम् आदत्ते?
3. बुद्ध्या' इति पदाय श्लोके कः शब्दः प्रयुक्तः?
4. दत्ते इति पदस्य किं विलोमपदं प्रयुक्तम्?
5. चतुर्थांशः इत्यर्थं कः शब्दः प्रयुक्तः?
6. शिष्य इति कर्तृपदस्य क्रियापदं किम्?

**5. रिक्तस्थानानि पूरयत –**

(क) स्वल्पं तथा ..................बहवश्च विध्नाः।
(ख) दिनान्ते च दुग्धं .............................।
(ग) ....................सुखं न अस्ति।
(घ) केषाञ्चिदपि ..........................गम्यते।
(ङ.) वृक्षाः ..........................शोधकाः।

————000———

R2KPT5

अष्टमः पाठः

# स्वामी आत्मानन्दः

R2HQS8

'यत्र जीवः तत्र शिवः' इति मंत्रस्य साधकः त्यागमूर्तिश्च स्वामी आत्मानन्दः सदैव जनानां कल्याणार्थं समर्पितः आसीत्। सः ईदृशः सन्तः आसीत् यत् यस्य ध्येयवाक्यं सर्वत्र प्रशंसितम् आसीत्। यथा –

**"परगुण परमाणून् पर्वतीकृत्य नित्यम्।**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।"**

तस्य पितुः नाम धनीरामः मातुः नाम भाग्यवती च आसीत्। तौ धर्मपरायणौ आस्ताम्। स्वामी आत्मानन्दस्य जन्म 06 अक्टूबर 1929 तमे वर्षे अभवत्। आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्रः आसीत्। सः 27 अगस्त 1989 तमे वर्षे निर्वाणं प्राप्य ब्रह्मलीनश्चाभवत्।

तस्य लक्ष्यमासीत् –

**" न त्वहं कामये राज्यं न च स्वर्गं नापुनर्भवम्।**
**कामये दुःख– तप्तानां प्राणिनामार्तिनाशनम्।।"**



तस्यानुजाऽपि तस्यानुकरणं कृतवन्तः। तस्येच्छया तस्य मित्रैः शुभचिन्तकैश्च रायपुरे विवेकानन्द–विद्यापीठं स्थापितम्। तत्र बी.एड. प्रशिक्षणस्यापि समुचिता नवाचारी व्यवस्था वर्तते। बस्तरवनप्रान्तरे नारायणपुरे अबूझमाडक्षेत्रे रामकृष्णमिशनाश्रमः स्थापितः। अस्य सचिवेन पूज्यपाद– स्वामिना निखिलात्मानन्देन अपूर्वं नेतृत्वं प्रदत्तम्। अनेन आश्रमेण शिक्षा–चिकित्सा–

कृषि–जनसेवा–कृषकप्रशिक्षण केन्द्र–युवाप्रशिक्षणकेन्द्र–चलितचिकित्सा–विपणनक्षेत्रेषु च अति सम्पन्नानि सेवाकेन्द्राणि सञ्चालितानि सन्ति। आध्यात्मिकक्षेत्रेऽपि अस्य प्रयासः प्रशंसितः।

स्वामी विववेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्। येन इदं नगरं परिपूतमभवत्। स्वामी विवेकानन्द– जन्मशताब्दी–वर्षे भव्यं स्मारकं निर्मातुं सः आत्मानंदः प्राणपणेनायतत्। अयम् आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति। आश्रमैव 'पालीक्लिनिक' इति औषधालयः ग्रन्थालयः च स्थापितः। तत्रैव स्थापिते ठाकुररामकृष्णदेवालये स्वर्गोपमानि आनन्दानि प्रसृतानि।

स्वामी आत्मानंदः अतीव प्रतिभाशाली–वक्ता लेखकश्चापि आसीत्। आध्यात्म–सम्बन्धीनां अन्य– विषयानां च प्रवचनैः सः देशे ख्यातिं लब्धवान्। तस्य द्विखण्डात्मकं 'गीता–तत्त्वचिन्तनम्' इति ग्रंथः अतीव मनोहरः अस्ति। धर्मदर्शनक्षेत्रे अस्य महाभागस्य कृतयः पाठकेषु वैज्ञानिकदृष्टयभिवृद्धिं कुर्वन्ति।

स्वामीआत्मानन्दस्य संगठनकौशलम् अपूर्वम् आसीत्। तस्य निर्देशने संरक्षणे च मध्यप्रान्ते, महाराष्ट्र–उडीसा–राजस्थान–छत्तीसगढे बहवः रामकृष्णविवेकानन्द–आश्रमाः प्रतिष्ठिताः। अयं महापुरुषः शैशवकालादेव मेधावी प्रतिभासम्पन्नश्च आसीत्। सन् 1938 तमे वर्षे अस्य पिता महात्मा–गान्धिना स्थापिते बुनियादी–प्रशिक्षणविद्यालये वर्धायां शिक्षक–रुपेण नियुक्तः। प्रति रविवारे पिता–पुत्रौ गांधिनः दर्शनार्थं सेवाश्रमम् गच्छतः स्म। तत्र बालः तुलेन्द्रः गान्धिनः भ्रमण–सहायकश्चासीत्। अत्रैव तस्य बालमनसि सेवाभावना–बीजं स्फुटितम्। पित्रा सह बरबन्दाग्रामे अस्य शैशवं छात्रजीवनं च व्यतीतम्। तेन सर्वासु परीक्षासु प्रथमश्रेण्यामुत्तीर्य प्रतिभा–प्रतिस्थापिता। 1951 तमे वर्षे नागपुर–विश्वविद्यालयेन एम.एससी. (विशुद्धगणित) उपाधि स्वर्णपदकं च प्रदत्ते। सर्वोच्चाङ्कं प्राप्य कैम्ब्रिज विश्वविद्यालयस्य 'रेंग्लर फेलोशिप' प्राप्तवानसौ।

अनन्तरं भारतीय– प्रशासकीय–सेवा–परीक्षायामपि सफलतां प्राप्तवान् परन्तु मौखिक–
–परीक्षां त्यक्तवान्। तदनन्तरं तेन स्वजीवनं श्रीरामकृष्ण–विवेकानन्द–चरणौ समर्पितम्।

## शब्दार्थाः

| | | |
|---|---|---|
| ईदृशः | = | ऐसा |
| कियन्तः | = | कितने |
| कामये | = | चाहते हैं |
| पुनर्भवम् | = | पुनर्जन्म / (मोक्ष) |
| आर्ति | = | दुःख |
| परिपूतः | = | पवित्र हुआ |
| स्फुटितम् | = | अंकुरित हुआ |
| अपूर्वम् | = | जो पूर्व में न हुआ हो |
| प्रतिष्ठिताः | = | स्थापित हुए |
| व्यतीतम् | = | बिताया |
| प्राप्तवान् | = | प्राप्त किया |

## अभ्यासः प्रश्नाः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –
   1. आत्मानन्दस्य पितुः नाम किम्?
   2. आत्मानन्दस्य जन्म कदा अभवत्?
   3. आत्मानन्दस्य बाल्यकालस्य नाम किम् आसीत्।
   4. रामकृष्णमिशन आश्रमः कुत्र संस्थापितः?
   5. आत्मानन्देन लिखितग्रन्थस्य नाम किम्?
   6. स्वामीविवेकानन्दः रायपुरे कति वर्षं व्यतीतवान्?
2. अधोलिखितानां वाक्यानां हिन्दीभाषया अनुवादं कुरुत –
   1. मातुः नाम भाग्यवती आसीत्।
   2. न त्वहं कामये राज्यम्।
   3. अत्र सेवाकेन्द्राणि सञ्चालितानि।
   4. इदं नगरं परिपूतमभवत्।
   5. सः देशे ख्यातिं लब्धवान्।

3. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत –

1. मै स्वर्ग नहीं चाहता हूँ।
2. आत्मानन्द के पिता का नाम धनीराम था।
3. नारायणपुर बस्तर वनप्रान्त में है।
4. स्वामी आत्मानंद का संगठन कौशल अपूर्व था।
5. उनके द्वारा जीवन समर्पण किया गया।

4. रिक्तस्थानानि पूरयत –

1. आत्मानन्दस्य .............सर्वत्र प्रशंसितम् आसीत्।
2. .......................तमे वर्षे आत्मानन्दः ब्रह्मलीनः अभवत्।
3. रायपुरे विवेकानन्द–विद्यापीठं .................................. ।
4. ............................नेतृत्वं प्रदत्तम।
5. कैम्ब्रिज विश्वविद्यालयस्य ..........................फेलोशिप प्राप्तवानसौ।

5. अधोलिखितानां पदानां मूलशब्द–विभक्ति–लिङ्गानि लिखत –

| शब्दरुपम् | पदम् | मूलशब्दः | विभक्तिः | लिङ्गम् |
|---|---|---|---|---|
| यथा– | समाजे | समाज | सप्तमी | पुल्लिङ्ग |
| 1. | भक्तस्य | ––––– | ––––– | ––––– |
| 2. | भाग्यवत्याः | ––––– | ––––– | ––––– |
| 3. | इच्छया | ––––– | ––––– | ––––– |
| 4. | प्रान्तरे | ––––– | ––––– | ––––– |
| 5. | वर्धायाम् | ––––– | ––––– | ––––– |

6. अधोलिखितानां पदानां धातुलकारपुरुषवचनानि लिखत–

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | आसीत् | अस् | लङ्ग | प्रथम | एक |
| 1. | वर्तते | ––––– | ––––– | ––––– | ––––– |
| 2. | सन्ति | ––––– | ––––– | ––––– | ––––– |
| 3. | कुर्वन्ति | ––––– | ––––– | ––––– | ––––– |
| 4. | अगच्छत् | ––––– | ––––– | ––––– | ––––– |
| 5. | कथयन्ति | ––––– | ––––– | ––––– | ––––– |

7. अधोलिखितानां अव्ययानां वाक्यप्रयोगं कुरुत –

1. सर्वत्र 2. च 3. इदम् 4. सम्प्रति 5. सह

8. पाठे निहितान् प्रत्ययान् चित्वा वाक्ये प्रयोगं कुरुत–

R2HLTV

–––––000––––

## uoe% ikB%

# vknu lDre

प्रस्तुत सूक्त अथर्ववेद से लिया गया है। चावल पक जाने के बाद भात बनता है। उसमें धान कूटने, फटकने, भूसा निकालने और उसे पकाने की कई प्रक्रियाएं होती हैं। इन सबका रूपक अलंकार की सहायता से वर्णन किया गया है। यज्ञ करनेवाले को इस भात के माध्यम से सभी लोक प्राप्त हो जाते हैं, यह कहकर उसकी महिमा बताई गई है।

चक्षुर्मुसलं काम उलूखलम् ।।1।।

दितिःशूर्पमदितिःशूर्पग्राही वातोपावनिक् ।।2।।

अश्वाः कणा गावस्तण्डुला मशकास्तुषाः ।।3।।

इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ।।4।।

ऋतं हस्तावनेजनं कुल्योपसेचनम् ।।5।।

ऋतवःपक्तार आर्तवाः समिन्धते ।।6।।

तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् ।।7।।

द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी

सप्तऋषयः प्राणापानाः ।।8।।

ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः ।।9।।

## शब्दार्थाः

चक्षुः= दृष्टि, मुसलम्= मूसल, कामः= इच्छा या अभिलाषा, उलूखलम् = ओखली, दितिः= असुरों की माता, शूर्पम्= सूप, अदितिः= देवों की माता, शूर्पग्राही= सूप पकड़ने वाली, अपाविनक् = भूसे को अलग करने वाला, तण्डुलाः= चावल, मशकाः= मच्छर, तुषाः=भूसा, कुम्भी= स्थाली, राध्यमानस्य= पकनेवाला का, द्यौ=द्युलोक, अपिधानम्= ढक्कन, ऋतम्= पृथ्वी का समस्त जल, अवनेजनम्= प्रक्षालन के लिए, कुल्या= छोटा तालाब या नहर

उपसेचनम्= धोवन धोने के बाद निकलने वाला जल, ऋतवः= वसन्तादि छह ऋतुएँ, पक्तारः= पकानेवाले या रसोइये, आर्तवाः= ऋतु संबंधी दिन और रात, समिन्धते= जलाते हैं, ओदनस्य= भात का, बृहस्पतिः= ऋग्वैदिक देवता, शिरः= शिर/मस्तक, द्यावापृथिवी= आकाश और भूमि, श्रोत्रे = दोनों कान, अक्षिणी= दोनों आँखें, प्राणापानाः= श्वास और निश्वास, यज्ञवचः=यज्ञ करनेवाले, समाप्याः= प्राप्त करते हैं ।

## अन्वय

चक्षुः मुसलं काम उलूखलम् ।।1।।

शूर्पम् दितिः शूर्पग्राही अदितिः अपावनिक् वातः ।।2।।

कणा अश्वाः तण्डुलाः गावः तुषाः मशकाः ।।3।।

इयमेव पृथिवी कुम्भी भवति राध्यमानस्य ओदनस्य अपिधानम् द्यौः ।।4।।

हस्तावनेजनं ऋतम् उपसेचनम् कुल्या ।।5।।

पक्तार ऋतवः समिन्धते आर्तवाः ।।6।।

तस्य ओदनस्य शिरः बृहस्पतिः मुखम् ब्रह्म ।।7।।

श्रोत्रे द्यावापृथिवी अक्षिणी सूर्याचन्द्रमसौ प्राणापानाः सप्तऋषयः ।।8।।

यज्ञवचः ओदनेन सर्वे लोकाः समाप्याः ।।9।।

## भावार्थ

1. चक्षु है मूसल और इच्छा है ओखली (जिसमें मूसल से धान कूटा जाता है।)

2. सूप है दिति, सूप पकड़नेवाली है अदिति और (भूसे को चावल से) अलग करने वाली है हवा।

3. चावल हैं गायरूप, उसके कण हैं अश्वरूप और भूसा हैं मच्छर रूप।

4. (चावल पकाने के लिए) यही पृथ्वी पात्र बर्तन है और पकाए जा रहे भात (के पात्र) का ढक्कन है द्युलोक।

5. हाथ धोने के लिए ऋत यानी पृथ्वी का समस्त जल है। धोवन यानी धोने के बाद निकला जो जल है वह छोटा–मोटा तालाब है।

6. (चावल को पकानेवाली) रसोइया हैं वसन्तादि छह ऋतुएँ और इन्धन हैं ऋतु से सम्बन्धित दिन और रात।

7. उस ओदन यानी भात का मस्तक है बृहस्पति और मुख है ब्रह्म।

8. (उस ओदन के) दोनों कान हैं द्यावापृथिवी यानी आकाश और भूमि। दोनों आँखें हैं सूर्य और चन्द्रमा। प्राण व अपान वायु सात ऋषि हैं।

9. यज्ञ करने वाले ओदन के माध्यम से समस्त लोक को प्राप्त करते हैं ।

## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत।**

(क) देवानां माता अदितिः किं करोति ?

(ख) वातः किं करोति तण्डुलस्य ?

(ग) कस्य पिधानं करोति द्यौः ?

(घ) तण्डुलस्य पाककार्यं काः कुर्वन्ति?

(ड.) सूर्यः चन्द्रश्च ओदनस्य कौ स्तः?

(च) ओदनेन कस्मै सर्वे लोकाः समाप्याः ?

**2. भिन्नप्रकृतिकं पदं चिनुत –**

(क) मुसलम्, उलूखलम्, शूर्पम्, कुल्या, कुम्भी

(ख) दितिः, अदितिः, कुन्ती, अंजनी, शकुनिः

(ग) शिरः, मुखम्, वस्त्रम्, हस्तम्, पादम्,

(घ) बृहस्पतिः, द्युलोकः, पृथ्वी, वरुणः, शनिः

(ड.) यज्ञवचः, ऋतवः, वसन्तः, शिशिरः, ग्रीष्मः

3. कोष्ठकान्तर्गतेषु शब्देषु उपयुक्तां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत –

(क) असुराणां .......... दितिः शूर्पमस्ति। (मातृ)

(ख) तण्डुलाः ........... पच्यन्ते। (कुम्भी)

(ग) राध्यमानस्य ओदनस्य पक्तारः सन्ति ........... । (ऋतु)

(घ) .......... मुखम् ब्रह्म अस्ति। (ओदन)

(ङ.) प्राणापानाः ........... सप्तऋषयः सन्ति। (वायु)

4- LFkyinkU;f/kdR; Ik'ufuek.k d#rA

(क) उलूखले मुसलेन अन्नं कुट्ट्यते।

(ख) तण्डुलाः गावः इव सन्ति।

(ग) हस्तप्रक्षालनार्थम् ऋतम् अस्ति।

(घ) बृहस्पतिः देवानां गुरुः मन्यते।

(ङ.) वेदेषु द्यावापृथिवी युगलदेवरुपेण वर्णितौ।

5. अधोलिखितानां प्रश्नानाम् उत्तराणि मातृभाषया लिखत।

(क) आपने ओखली और मूसल का प्रयोग कहां कहां देखा है ?

(ख) हवा अनाज के साथ क्या क्या करती है ?

(ग) अनाज के भूसे का कौन सा गुण मशक से मिलता है ?

(घ) अपने आस पास आपने किन किन लोगों को रसोइये के रुप में देखा है ?

(ङ.) उपर्युक्त मन्त्रों में शरीर के किन किन अंगों का उल्लेख आया है ?

6. तृच् प्रत्ययान्तानां नवीनानां शब्दानां निर्माणं कुरुत।

यथा – पच् + तृच् – पक्ता

नी + तृच् – .......

कृ + तृच् – .......

दा + तृच् – .......

वच् + तृच् – .......

श्रु + तृच् – .......

7. छत्तीसगढ़ को धान का कटोरा कहा जाता है। अपनी भाषा में धान की रोपाई, निदाई, कटाई के गीतों का संग्रह कीजिए।
8. भात बहुत सारे लोगों का प्रिय भोजन है। कक्षा के बच्चे अपने प्रिय भोजनों की सूची बनाएं और उनके संस्कृत शब्द लिखें।

———000———

R3FDX6

दशमः पाठः

# परिवारः लघु एव वरम्

R3P9YT

तीव्रगति से बढ़ती हुई जनसंख्या देश की एक प्रमुख समस्या है। इस समस्या की वृद्धि के कारणों में निरक्षरता भी एक प्रमुख कारण है। शिक्षा का प्रचार–प्रसार कर, छोटे परिवार के महत्व को बताया जा सकता है। प्रस्तुत पाठ में सरल एवं हृदयस्पर्शी परिसंवादों के माध्यम से बड़े परिवार में आने वाली समस्याओं एवं कठिनाइयों को उद्घाटित करते हुए छोटे परिवार के महत्व को चित्रित किया गया है।



(ज्वरपीड़ितः मोहनः पर्यङ्के शयानोऽस्ति। तस्मिन्नेव कक्षे गृहिणी गृहकर्मणि संलग्ना अस्ति। मोहनस्य अष्टकन्याः द्वौ पुत्रौ च संति।)

मोहन : – अद्य मां भृशं शिरोवेदना बाधते। रात्रौ अपि न सुखेन शयितो अस्मि। राधिके गृहकार्यं परित्यज्य इत एव आगच्छ।

राधिका – त्वं वारं–वारं मां आह्वयसि, किमहं करोमि? आसन्नं हि दीपमालिकापर्व। गृहे दशरुप्यकाणि अपि न सन्ति। किं एवमेव मम जीवनं यास्यति। इति विचार्य विचार्य गहने तमसि निमग्नं मे मनः।

गोविन्दः– (प्रविश्य) पितृवर! अहं विद्यालयात् आगतोऽस्मि। श्वः अहं विद्यालयं न गमिष्यामि। मम हस्ते श्यामपट्िका लेखनवर्तिका चापि नास्ति। एकं पुस्तकमपि न वर्तते पठनार्थम् अभ्यास–पुस्तिकानां तु का कथा।

विद्या – मम कक्षाध्यापिका मां प्रतिदिनं विद्यालयशुल्कपूर्तये भर्त्सयति। सर्वाः मम सहपाठिन्यः मामेव लक्षीकृत्य हसन्ति। सर्वाभिः छात्राभिः विद्यालयशुल्कं दत्तम्। मासान्ते कक्षापञ्जिकायाः मम नाम कर्तिष्यति।

कमला – मातः! प्रतिदिनमेव मह्यं कक्षाध्यापिका विषयाध्यापकाश्च विद्यालयगणवेशं धारयितुं कथयन्ति। अहं तु एकं मलिनं वस्त्रं परिधाय विद्यालयं यामि। प्रतिदिनमेव मे कक्षायाः बहिः निष्कासनं क्रियते। कक्षागवाक्षात् एव पाठ्यमानं विषयं अहं शृणोमि।

श्यामा – मातः! दशमी कक्षा तु मया उत्तीर्णा। न प्रेषयसि मां विद्यालयं साम्प्रतम्। गृहमेव उपविष्टा अहं किं करिष्यामि। देहि मे त्रिंशतरुप्यकाणि अहं सूचिकर्मणः प्रशिक्षणं प्राप्तुं प्रशिक्षणालयं यास्यामि।

गोपालः– पितः! देहि मे शतरुप्यकाणि मम भगिनी विद्या मह्यं द्वे क्रीडनके क्रेतुम् आपणं यास्यति।

निर्मला– पितः मम पार्श्वे चित्रकर्माभ्यासपुस्तिका नास्ति। देहि मे पञ्चविंशतिरुप्यकाणि अद्यैव तां क्रीत्वा अहं विषयाध्यापिकया दत्तं गृहकार्यं करिष्यामि।

राधिका– स्वामिन्! इयं मे पुत्री मनोरमा कियत्कालात् रुग्णा वर्तते। किञ्चिदपि न खादति, शयाना एव दिनं यापयति। चिकित्सायै आतुरालयं गन्तुं धन–व्यवस्था अपि नास्ति।

सीता – मम सख्युः रशीदायाः परिणयोत्सवः आसन्नो वर्तते। मम अन्याः सख्यः तु सहस्त्राणां रुप्यकानाम् अभिनवान् उपहारान् दास्यन्ति। दास्यामि किमहं तस्यै। द्विशतं रुप्यकानां व्यवस्थां विना कोऽपि उपहारः आपणात् न लप्स्यते।

कविता – मातः! जीर्णानि मे सर्वाणि वस्त्राणि। दीप–मालिकापर्वणि तु नववस्त्राणि परिधाय लक्ष्मीपूजनं करिष्यामि।

सीमा – पितः! नगरे सर्वत्र दीपमालिकापर्वणः शुभागमने अग्निक्रीडनकानां पटापटशब्दः श्रूयते। अस्माकं गृहं न शोधितं न धवलीकृतं। मम सखीभिः तु प्रभूतेन धनव्ययेन क्रीतानि अग्निक्रीडनकानि। इदानीं तु अहमपि पञ्चशतरुप्यकानाम् अग्निक्रीडनकानि क्रेतुम् इच्छामि।

मोहनः – न पश्यथ यूयं मम अवस्थाम्। ज्वरेण वेपते मे शरीरम्। एकतः रुग्णावस्था, अपरतः स्वार्थ–प्रेरिता यूयं सर्वे स्वमनोरथान् एव पश्यथ। सत्यमेवोच्यते– ''छिद्रेष्वनर्थाः बहुली भवन्ति।''

(मोहनस्य अभिन्नं मित्रम् अनिलः स्वभार्यया सह प्रविशति द्वे कन्ये महिमा, गरिमा चापि प्रविशतः। सर्वे अभिवादनं कुर्वन्ति।)

अनिलः– मित्रवर! नमस्ते! शुभं ते दीपोत्सवः भवतु। नगरे सर्वत्र दीप–महोत्सवस्य चाकचक्यं दृश्यते। त्वं कथं म्लानमुखः शयानोऽसि। अस्माकं भ्रातृजायापि कथं तूष्णीमुपविष्टा। अपि कुशलिनः भवन्तः?

मोहनः– मित्र! किं कथयामि ? शून्यमिव दृश्यते मे जगत्। मत्कृते तु जीवने न कोऽपि अभिलाषः। अहन्तु मरणमेव शरणं पश्यामि।

श्रुतिः– भ्रातृवर! अस्मिन् हर्षोल्लासमये कातरवचनानि ब्रुवाणः अस्माकं भगिनीं पुत्रान्, कन्यकाः च कथं दुःख–सागरे निमज्जयसि। संसारे दुःखानि सुखानि च चक्रवत् परिवर्तन्ते। आत्मबलं न त्याज्यम् आपत्स्वपि।

मोहनः– मित्र! परिवार एव मम दुःखस्य कारणम्। मम एषा पुत्री श्यामा विवाहयोग्या संजाता।

अनिलः– मित्रवर! न ते वचोऽभिनन्दामि। चिन्ता तु शिक्षादीक्षाकृते च करणीया। यदि अन्यथा न मन्यसे तर्हि वृहत् परिवारः एव युष्मदीयं दुःखकारणम्। वृत्या तु भवत्सदृशमेव अर्थोपार्जनं क्रियते मया।

श्रुतिः– भ्रातृवर! मम तु कन्ये पुत्रसमे एव स्तः। एका तु चिकित्साक्षेत्रे आयुर्वेद–पाठ्यक्रमे अध्ययनं करोति। अपरा संस्कृत स्नातकोत्तर–पाठ्यक्रमे पठति। आवां स्वस्थप्रसन्नौ स्व द्वे कन्यकेऽपि च। अस्माकं सदनं सानन्दम्।

राधिका– भगिनि! आवाभ्यां नियोजितपरिवारविषये कदापि न चिन्तितम्। अस्मिन् विषये पूर्वम् आवां न प्रेरितौ।

अनिलः – गतस्य शोचनं न करणीयम्। लघुपरिवारविषये अन्यान् प्रेरयन् स्वपरिवारम् अपि प्रकारान्तरेण प्रेरय। मत्सामर्थ्यानुसारेण अहं सहयोगाय तत्परः। इदानीम् अस्मान् गृहगमनाय आज्ञापयतु।

मोहनराधिके – गच्छतु भवान् पुनर्दर्शनाय।

(श्रुत्यनिलौ पुत्रीभ्यां सह स्वगृहं प्रति गच्छतः)

## शब्दार्थाः

| | | |
|---|---|---|
| पर्यङ्के | = | पलङ्ग पर |
| भृशं | = | बहुत |
| शिरोवेदना | = | सिरदर्द |
| इत एव | = | यहीं |
| आह्वयसि | = | बुलाते हो |
| आसन्नं | = | निकट |
| यास्यति | = | जायेगा, बीतेगा |
| गहनेतमसि | = | गहन अंधकार में। |
| श्यामपट्टिका | = | स्लेट/पट्टी |
| लेखनवर्तिका | = | पेंसिल |
| शुल्कपूर्तये | = | शुल्क पटाने के लिए |
| भर्त्सयति | = | डाँटते हैं |
| लक्षीकृत्य | = | लक्ष्य करके |
| कक्षापञ्जिकायाः | = | कक्षा के रजिस्टर में से |
| कर्तिष्यति | = | काटेंगे |
| परिधाय | = | पहनकर |
| यास्यामि | = | जाऊँगी |
| गवाक्षात् | = | खिड़की से |
| पाठ्यमान | = | पढ़ाये जा रहे |
| प्रेषयसि | = | तुम भेजते हो |
| उपविष्टा | = | बैठी हुई |
| सूचिकर्मणः | = | सिलाई के काम का |
| क्रीडनके | = | खिलौने |

| | | |
|---|---|---|
| आपणं | = | दुकान/ बाजार |
| चित्रकर्म | = | चित्रकार के काम की/चित्रकारी |
| क्रीत्वा | = | खरीदकर |
| कियत् | = | कितने |
| रुग्णा | = | बीमार |
| आतुरालयम् | = | अस्पताल |
| परिणयोत्सवः | = | विवाहोत्सव |
| जीर्णानि | = | फटे पुराने |
| अग्निक्रीडनकानाम् | = | पटाखों का |
| शोधितम् | = | साफ किया गया। |
| धवलीकृतम् | = | सफेदी दी गई। पोता गया |
| वेपते | = | काँप रहा है। |
| छिद्रेष्वनर्थाः बहुली भवन्ति | = | कमियों में बहुत अनर्थ होते है। |
| स्वमनोरथान् | = | अपनी इच्छाओं को |
| चाकचक्यम् | = | चकाचक, चकाचौंध |
| भ्रातृजाया | = | भाभी, भौजाई |
| परिवर्तन्ते | = | घूमते हैं |
| आपत्स्वपि | = | विपत्तियों में भी |
| खलु | = | निश्चित ही |
| अभिनन्दामि | = | सहमत हूँ |
| करणीया | = | करनी चाहिए |
| युष्मदीयम् | = | तुम्हारी |
| वृत्या | = | नौकरी से/ पेशे से |
| शोचनम् | = | शोक |
| प्रकारान्तरेण | = | अलग–अलग ढंग या माध्यम से |

## अभ्यासः

1. संस्कृतभाषया उत्तरत –

(क) मोहनः कया वेदनया पीडितः आसीत्?

(ख) किं पर्व आसन्नं वर्तते?

(ग) गोविन्दः केन कारणेन विद्यालयं गन्तुं न इच्छति?
(घ) का सूचिकर्मणः प्रशिक्षणं प्राप्तुं वाञ्छति?
(ङ) गोपालः किमर्थं रुप्यकाणि याचते?
(च) दीपमालिकापर्वणि कस्य शब्दः श्रूयते?
(छ) संसारे कानि–कानि चक्रवत् परिवर्तन्ते?
(ज) कीदृशः परिवारः एव वरम्?

2. अधोलिखितानां शब्दानां मूलशब्द–विभक्तिवचन–लिङ्गानि लिखत –

| | शब्दरुपम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| यथा– | विद्यालयात् | विद्यालय | पुल्लिंग | पञ्चमी | एक |
| 1. | पूर्तये | ––––– | ––––– | ––––– | ––––– |
| 2. | सर्वाभिः | ––––– | ––––– | ––––– | ––––– |
| 3. | कक्षायाः | ––––– | ––––– | ––––– | ––––– |
| 4. | मह्यम् | ––––– | ––––– | ––––– | ––––– |
| 5. | भार्यया | ––––– | ––––– | ––––– | ––––– |
| 6. | आवां | ––––– | ––––– | ––––– | ––––– |

3. अधोलिखितानां प्रश्नानामुत्तराणि लिखत–

1. 'क्त्वा और ल्यप्' का प्रयोग कर वाक्य बनाइये।
2. 'उपसर्ग और प्रत्यय' में अंतर उदाहरण सहित लिखिए–
3. 'तरप् एवं तमप्' प्रत्यय का प्रयोग कर सार्थक शब्द का निर्माण कीजिए।
4. सह,साकं, सार्धं, समं का प्रयोग कर वाक्य बनाइये।

4. निम्नांकितेषु तत्पुरुषसमासं चिनुत –

ज्वरपीडितः, शिरोवेदना, कक्षाध्यापिका, प्रतिदिनम्, विद्यालयगणवेशः, अभ्यासपुस्तिका, दीपमालिका, दीपोत्सवः।

5. अधोलिखितेषु पदेषु कृदन्ततद्धित–शब्दान् पृथक् कुरुत –

**शब्दाः –** गत्वा, मर्मज्ञः, प्रवक्ता लिखितः, पठितुम्, वात्सल्यम्, नष्टः, भवदीयः लघुतमः, पूजितः।

| | | | | | |
|---|---|---|---|---|---|
| 1. | कृदन्ताः | ––––– | ––––– | ––––– | ––––– |
| | | ––––– | ––––– | ––––– | ––––– |
| 2. | तद्धिताः | ––––– | ––––– | ––––– | ––––– |
| | | ––––– | ––––– | ––––– | ––––– |

6. अधोलिखितपदेषु संधिविच्छेदं कृत्वा नामानि लिखत –

| | पदम् | संधि–विच्छेदः | नाम |
|---|---|---|---|
| (क) | महतीह | ––––– | ––––– |
| (ख) | शयानोऽस्ति | ––––– | ––––– |
| (ग) | तस्मिन्नेव | ––––– | ––––– |
| (छ) | छिद्रेष्वनर्थाः | ––––– | ––––– |
| (ङ) | तूष्णीमुपविष्टा | ––––– | ––––– |

––––000–––

R3Y61G

# ,dkn'k% ikB%

# fofp=% I k{kh

R48234

प्रस्तुत पाठ श्री ओमप्रकाश ठाकुर द्वारा रचित कथा का सम्पादित अंश है। यह कथा बंगला के प्रसिद्ध साहित्यकार बंकिमचन्द्र चटर्जी द्वारा न्यायाधीश रूप में दिए गए फैसले पर आधारित है। सत्यासत्य के निर्णय हेतु न्यायाधीश कभी–कभी ऐसी युक्तियों का प्रयोग करते हैं जिससे साक्ष्य के अभाव में भी न्याय हो सके। इस कथा में भी विद्वान् न्यायाधीश ने ऐसी ही युक्ति का प्रयोग कर न्याय करने में सफलता पाई है।

कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः। पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।



पदातिक्रमेण संचलन् सायं समये अप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद्

गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्। विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रामघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा अभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक–पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततो तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।

अन्येद्युः तौ न्यायालये स्व–स्व–पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच–'रे दुष्ट! तस्मिन् दिने त्वया अहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्– मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः

निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनंससम्मानं मुक्तवान्। अतएवोच्यते –

**n"djk.;fi dekf.k efroHko'kkfyu%A**
**uhfra ;fDra lekyEC; yhy;o idqorAA**

### 'kCnkFkk%

| | | |
|---|---|---|
| भूरि | – | अत्यधिक |
| उपार्जितवान् | – | कमाया |
| निवसन् | – | रहते हुए |
| प्रसृते | – | फैलने पर |
| विजने प्रदेशे | – | एकान्त प्रदेश में |
| शुभावहा | – | कल्याणकारी |
| गृही | – | गृहस्थ |
| दैवगतिः | – | भाग्य की लीला |
| पलायितः | – | भाग गया, |
| प्रबुद्धः | – | जागा हुआ |
| त्वरितम् | – | शीघ्रगामी |
| प्रस्थितः | – | चला गया |
| अर्थकार्श्येन | – | धनाभाव के कारण |
| पदातिरेव | – | पैदल ही |
| निहिताम् | – | रखी हुई |
| अन्वधावत् | – | पीछे भागा |
| क्रोशितुम् | – | चिल्लाना |
| तारस्वरेण | – | ऊँची आवाज में |
| अभर्त्सयन् | – | भला–बुरा कहा |
| प्रख्याप्य | – | स्थापित करके |
| चौर्याभियोगे | – | चोरी के आरोप सें |
| नीतवान् | – | ले गया |
| अवगत्य | – | जानकर |
| दोषभाजनम् | – | दोषी |

| | | |
|---|---|---|
| उपस्थातुम् | – | उपस्थित होने के लिए |
| आरक्षिणम् | – | सैनिक |
| आदिष्टवान् | – | आज्ञा दी |
| स्थापितवन्तौ | – | स्थापना की |
| तत्रत्यः | – | वहाँ का |
| न्यवेदयत् | – | प्रार्थना की |
| क्रोशद्वयान्तराले | – | दो कोस के मध्य |
| आदिश्यताम् | – | आज्ञा दीजिए |
| उपेत्य | – | पास जाकर |
| काष्ठपटले | – | लकड़ी के तख्ते पर |
| निहितम् | – | रखा गया |
| पटाच्छादितम् | – | कपड़े से ढँका हुआ |
| वहन्तौ | – | वहन करते हुए |
| कृशकायः | – | कमजोर शरीरवाला |
| भारवतः | – | भारवाही |
| भारवेदनया | – | भार की पीड़ा से |
| क्रन्दनम् | – | रोने का |
| निशम्य | – | सुन करके |
| मुदितः | – | प्रसन्न |
| भुङ्क्ष्व | – | भोग करो |
| चत्वरे | – | चौकोर जगह, चबूतरेपर |
| लप्स्यसे | – | प्राप्त करोगे |
| प्रावारकम् | – | लबादा को |
| अपसार्य | – | दूर करके |
| अभिवाद्य | – | अभिवादन करके |
| अध्वनि | – | रास्ते में |
| यदुक्तम् | – | जो कहा गया |
| वारितः | – | रोका गया |
| मुक्तवान् | – | छोड़ दिया |
| समालम्ब्य | – | सहारा लेकर |
| लीलयैव | – | खेल–खेल से ही |
| आदिश्य | – | आदेश देकर |

## vH;kl%

### 1- vèkksfyf[krkuk i'ukuke mÙkjkf.k lLÑrHkk"k;k fy[kr&

(क) निर्धनः जनः कथं वित्तम् उपार्जितवान्?

(ख) जनः किमर्थं पदातिः गच्छति?

(ग) प्रसृते निशान्धकारे जनः किम् अचिन्तयत्?

(घ) वस्तुतः चौरः कः आसीत्?

(ङ.) जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान्?

(च) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति?

### 2- j[kkfdrinekèkkR; i'ufuek.k d#r&

(क) <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः।

(ख) <u>करुणापरो गृही</u> तस्मै आश्रयं प्रायच्छत्।

(ग) <u>चौरस्य</u> पादध्वनिना अतिथिः प्रबुद्धः।

(घ) <u>न्यायाधीशः</u> बंकिमचन्द्रः आसीत्।

(ङ.) <u>जनः</u> भारवेदनया क्रन्दति स्म।

(च) <u>उभौ</u> शवं चत्वरे स्थापितवन्तौ।

### 3- lfU/k@lfU/kfoPNn p d#r&

(क) पदातिरेव – ..................... + .....................

(ख) निशान्धकारे – ..................... + .....................

(ग) अभि + आगतम् – ..............................................

(घ) भोजन + अन्ते – ................................................

(ङ.) चौरोऽयम् – ...................... + ......................

(च) गृह + अभ्यन्तरे – ................................................

(छ) लीलयैव – ...................... + ......................

(ज) यदुक्तम् – ...................... + ......................

(झ) प्रबुद्धः + अतिथिः– ................................................

## 4- v/kkfyf[krkfu inkfu fHkUu&fHkUu iR;;kUrkfu lfUrA rkfu iFkd~ ÑRok fufn"Vkuk iR;;kuke/k% fy[kr&

**ifjJE;] mikftroku] nkif;re] iLFkr%] n"Ve] fogk;] i"Voku] ifo"V%] vknk;] Økf'kre] fu;Dr%] uhroku] fu.kre] vkfn"Voku] lekxR;] fu'kE;] ikP;] vilk;A**

| ल्यप् | क्त | क्तवतु | तुमुन् |
|---|---|---|---|
| ................. | .................... | ...................... | ............................... |
| ................. | .................... | ...................... | ............................... |
| ................. | .................... | ...................... | ............................... |

## 5- fHkUu iÑfrda in fpuqr&

(क) विचित्रा, शुभावहा, शंकया, मञ्जूषा

(ख) कश्चन, किञ्चित्, त्वरितं, यदुक्तम्

(ग) पुत्राः, तनयः, व्याकुल, तनूजः

(घ) करुणापरः, अतिथिपरायणः, प्रबुद्धः, जनः

**6- ¼d½ ^fud"kk* ^ifr* bR;u;k% 'kCn;k% ;kx f}rh;k&foHkfDr% HkofrA mnkgj.keu|lR; f}rh;k&foHkDr% i|;kx ÑRok fjDrLFkkuifr d|#r&**

**;Fkk& jktekx fud"kk er'kjhj orrA**

(क) ................ निकषा नदी वहति। (ग्राम)

(ख) ................ निकषा औषधालयः वर्तते। (नगर)

(ग) तौ ................ प्रति प्रस्थितौ। (न्यायाधिकारिन्)

(घ) मोहनः ................ प्रति गच्छति। (गृह)

**¼[k½ dk"Bd"k nÙk"k in"k ;Fkkfufn"Vk foHkfDr i|;T; fjDrLFkkukfu ij;r&**

(क) ................ निष्क्रम्य बहिरगच्छत्। (गृह शब्दे पंचमी)

(ख) चौरशंकया अतिथिः ................ अन्वधावत्। (चौरशब्दे द्वितीया)

(ग) गृहस्थः ................ आश्रयं प्रायच्छत्। (अतिथि शब्दे चतुर्थी)

(घ) तौ ................ प्रति प्रस्थितौ। (न्यायाधीश शब्दे द्वितीया)

**7- vèkkfyf[krkfu okD;kfu cgopu ifjorl;r&**

(क) स बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवान्।

(ख) चौरः ग्रामे नियुक्तः राजपुरुषः आसीत्।

(ग) कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(घ) अन्येद्युः तौ न्यायालये स्व–स्व–पक्षं स्थापितवन्तौ।

————000———

R4GX4R

R4QT6E

# }kn'k% ikB%

# geUr&o.kue~

*(संस्कृत साहित्य में प्रायः कविगण ऋतुओं का वर्णन करते हैं किन्तु हेमन्त वर्णन उन्हें अधिक नहीं रूचता। आदि कवि इसके अपवाद हैं। उन्होंने सरल मधुर शैली में इस ऋतु का मोहक वर्णन किया है। प्रस्तुत पद्यांश 'वाल्मीकि–रामायणम्'' के अरण्यकाण्ड से उद्धृत है।)*



अयं स कालः सप्राप्तः प्रियो यस्ते प्रियंवद।
अलंकृत इवाभाति येन संवत्सरः शुभः ।। 1।।

नीहार परुषो लोकः, पृथिवी सस्यशालिनी।
जलान्यनुपभोग्यानि, सुभगो हव्यवाहनः।। 2।।

सेवमाने दृढं सूर्ये दिशमन्तकसेविताम्।
विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते।। 3।।

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्व साम्प्रतम्।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः।। 4।।

अत्यन्तसुखसञ्चारा मध्याह्ने स्पृशतः सुखाः।
दिवसाः सुभागादित्याश्छायासलिलदुर्भगाः।। 5।।

मृदुसूर्याः सनीहाराः पटुशीताः समारुताः।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति साम्प्रतम्।। 6।।

रविसंक्रान्त–सौभाग्यस्तुषारारुणशीतलः।
निः श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।। 7।।

ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते।
सीतेव चातप श्यामा लक्ष्यते न तु शोभते।। 8।।

प्रकृत्या शीतलस्पर्शो हिमविद्धश्चसाम्प्रतम्।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः।। 9।।

खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः।
शोभन्ते किञ्चदानम्राः शालयः कनकप्रभाः ।। 10।।

अवश्यायतमोन्नद्धा नीहारतमसा वृताः।।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ।। 11।।

## 'kCnkFkk%

| | | |
|---|---|---|
| परुषः | = | कठोर |
| सुभगो | = | सुन्दर |
| हव्यवाहनः | = | अग्नि |
| संवत्सरः | = | वर्ष, साल |
| नीहारपरुषः | = | ओस के कारण अकड़ा हुआ। |
| अनुपभोग्यानि | = | उपयोग के अयोग्य |
| हिमविद्धः | = | बर्फ से जमा हुआ। |
| अन्तकसेविता दिक् | = | दक्षिण दिशा (दक्षिण दिशा अन्तक–यम की दिशा मानी जाती है।) |
| आदर्शः | = | शीशा, दर्पण |
| लक्ष्यते | = | दिखाई देता है। |
| शालयः | = | बड़े धान के पौधे |
| अवश्याय | = | ओस। |

## Ieki k%

| | | |
|---|---|---|
| सस्यशालिनी | = | सस्येन (अन्नेन) शालते (शोभते) इति। |
| हव्यवाहनः | = | हव्यं वाहतीति। |
| हिमकोशाढ्य | = | हिमस्य कोशः इति हिमकोशः तेन आढ्यः। |
| सनीहाराः | = | नीहारैः सह |
| अवश्याय–तमोन्नद्धाः | = | अवश्यायं च तमश्च इति अवश्यायतमसी ताभ्यां नद्धाः। |

# vH;kl%

## 1- vèkkfyf[krkuk i'ukuke mÙkjkf.k lLÑrHkk"k;k fy[kr&

1. हेमन्तकाले किं सुखावहं भवति?
2. कीदृशाः दिवसाः भवन्ति हेमन्ते?
3. हेमन्त–ऋतौ शालयः कामवस्थां प्रतिपद्यन्ते?

## 2- vèkkfyf[krkuk okD;ku lLd`rHkk"k;k vuqokn d#r &

1. इस ऋतु से संवत्सर शोभित होता है।
2. इस समय धूप अच्छी लगती है।
3. हेमन्त में उत्तर दिशा मलिन दिखाई देती है।
4. शीत के डर से पक्षी पानी में नहीं घुसते हैं।
5. इस समय वृक्ष सोये से दिखाई देते हैं।

## 3- vèkkfyf[krkux.k vH;kldk;l d#r &

1. प्रथम श्लोक का अन्वय कीजिए।
2. चौथे श्लोक में उपमा को समझाइए।
3. इस वर्णन के आधार पर हेमन्त का वर्णन कीजिए।
4. आठवें श्लोक का अर्थ लिखिए।
5. कवि ने शालि धान के लिए कौन–कौन से विशेषण दिए हैं?

–––––000–––

R4ZP82

त्रयोदशः पाठः

# यात्रा मङ्गलम्प्रति

*(विषय प्रवेश– अन्तरिक्ष के ज्ञान–विज्ञान की परम्परा में भारतीयों का योगदान वन्दनीय रहा है। इसी परम्परा की एक कड़ी* ***इसरो*** *द्वारा प्रक्षेपित मङ्गलयान है। इसरो के इस सफल अभियान ने अन्तरिक्ष सम्बन्धी शोध के क्षेत्र में सम्पूर्ण विश्व में भारत का वर्चस्व स्थापित किया है। प्रस्तुत पाठ में मंगलयान से सम्बद्ध (कई तथ्यों को उद्घाटित किया गया है।)*

5 नवम्बरः 2013 खीष्टाब्दस्य बुधवासरे सर्वत्र मङ्गलम् मङ्गलमिति ध्वनिः भारते व्याप्ता आसीत्। भारतीयानां दृष्टिः इसरोसंस्थायाः मङ्गलक्रार्यक्रमे आसीत्। श्रीहरिकोटायाः सतीशधवनान्तरिक्षकेन्द्रे उपस्थिताः जना उल्लसिताः आसन्। प्रायः सार्धसप्तवादने मङ्गलयानस्य प्रवाहकः भागः सक्रियः अभवत्। ततः निमेषानन्तरम् एव तस्य साफल्यम् असाफल्यम् वा निर्धारितम् आसीत्। परं बुधवासरः मङ्गलमयः अभवत्, यदा मॉम (मार्स ऑर्बिटर मिशन) इत्यस्य प्रथमं चरणं सफलं जातम्।



मङ्गलयानस्य सफलपरीक्षणेन न केवलं भारतस्य अपितु एशियामहाद्वीपस्यापि प्रतिष्ठा वैश्विकपटले समेधिता। यतः अद्यावधिपर्यन्तं न हि कश्चन देशः स्वकीये प्रथमप्रयासे मङ्गलग्रहं प्रति यानप्रेषणे सफलताम् अलभत। हर्षस्य विषयोऽयं यत् भारतः निजप्रथमे प्रयासे एव स्वलक्ष्यं प्राप्तवान्। अमेरिका, यूरोपसंघः, सोवियतरूसः इति त्रयेण सह भारतः चतुर्थः देशः अस्ति यस्य त्रिवर्णः ध्वजः मङ्गलग्रहे प्रतिभाति अपि चास्य देशस्य प्राविधिककौशलं प्रतिपादयति ।

सम्प्रति संसारेऽस्मिन् मङ्गलग्रहं प्रति यानप्रेषणस्य एकपञ्चाशत् (51) प्रयासाः अभवन्। तेषु प्रयासेषु एकविंशतिप्रयासाः (21) एव सफलाः जाताः। प्रयासेऽस्मिन् अमेरिकादेशस्य प्रथमः प्रयासः अपि विफलः जातः। नासा चतुष्षष्ठ्युत्तरैकोनविंशतिख्रीष्टाब्दे (1964) 'मैरीनर–9' मिशन इति माध्यमेन मङ्गलग्रहकक्षं प्राप्तवान्।

सामान्यतया अन्तरिक्षस्य अन्वेषणस्य कार्यक्रमः अतिव्ययसाध्यः भवति। परञ्च अस्माकं मङ्गलकार्यक्रमस्य इदं वैशिष्टयम् अस्ति यदत्र अतीव न्यूनं धनमेव व्ययीभूतम्। अस्मिन् क्रार्यक्रमे **पञ्चाशदुत्तरचतुश्शतकोटि**–रुप्यकानि (450) निवेशितानि। एतावद्धनम् न्यूनम् आसीत् अन्यदेशीयापेक्षया। अपि च नासायाः 'मावेन' मिशन इत्यस्य व्ययीभूतधनस्य दशमः भागः वर्तते। अतोऽत्यधिकं धनं तु वैदेशिकचलचित्रानिर्माणे निवेशितं भवति। भारतः 'तरलमोटर' इति प्रविधिना मङ्गलकक्षायां मङ्गलयानं स्थापितवान्। ततः पूर्वं न हि कश्चन देशः एतादृशाय कार्यक्रमाय 'तरलमोटर' इति प्रविधिं प्रयुक्तवान्। यतः प्रायः अस्य प्रविधेः प्रयोगः चन्द्रग्रहकक्षाप्रवेशाय क्रियते।

PSLV C-25 प्रक्षेपकयानेन मङ्गलयानं प्रक्षिप्तः। मङ्गलयानस्य गतिः प्रति निमेषम् 22. 57 किलोमीटर परिमीता इति आसीत्। वैज्ञानिकाः गतिनियन्त्राणं कृत्वा प्रति निमेषम् 4.6 किलोमीटर परिमितं कृतवन्तः। अयं कार्यक्रमः कठिनतमः आसीत्। यतः अत्र अवधेयता इयम् आसीत् यत् यानस्य गति एतावन्मन्दा मा भवतु येन तत् यानं मङ्गलस्य अधिकरणे ध्वस्तं भवेत्। अपि च यानस्य वेगः एतादृशः तीव्रः न स्यात् येन तत् मङ्गलकक्षात् बहिः अन्तरिक्षे विलुप्तताम् आप्नुयात्। अस्य यानस्य वेगः सप्तदा परिवर्तितः।

मङ्गलयानेन सार्धं कतिपयानि प्रयोगात्मकानि उपकरणानि यन्त्राणि चापि प्रेषितानि। तेषु छायाग्राहकयन्त्रेण मङ्गलग्रहे यानस्य प्रवेशे एव तस्य ग्रहस्य चित्रम् अधिगतम्। वस्तुतः अस्य प्रयोगस्योद्देश्यम् तत्र जीवनास्तित्वस्य अन्वेषणमेव। किं ब्रह्माण्डे पृथिवीग्रहे एव जीवाः विद्यन्ते इति मूलप्रश्नः। अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा? तस्याधारस्य, संरचनायाः, वातावरणस्य तत्रस्थाः ये खनिजपदार्थाः तस्याध्ययनम्। किं मगलग्रहे जलस्य अस्तित्वम् आसीत्? किमत्र रक्तग्रहे मीथेन अस्ति वा न यतः तस्यास्तित्वमेव जैविकं क्रियाकलापं निर्दिशति । एते प्रश्नाः अपि शोधनीयाः।

खलु अस्माकं मङ्गलयानकार्यक्रमः समग्रान्तरिक्षान्वेषणस्य शोधकार्यक्रमस्य आदर्शभूतः। अस्य साफल्येन अन्तरिक्षे भारतस्य प्रभावः उत्कर्षतां प्राप्नोत्। अनेन अन्तरीक्षव्यवसायस्य अवसरः आयास्यति युवानश्चापि सक्रियाः भविष्यन्ति।

## शब्दार्थाः

निमेषानन्तरम् = कुछ समय के बाद ही, प्राविशत् = प्रवेश किया, वैश्विकपटले = सम्पूर्ण विश्व में, समेधिता = बढ़ाया, अलभत् = प्राप्त किया, प्रतिभाति = दिखाई देता है, प्राविधिककौशलम्= तकनीकि कुशलता, ख्रीष्टाब्द = ईश्वी, व्ययीभूतम् = खर्च हुआ, चन्द्रकक्षाप्रवेशाय = चन्द्रमा के कक्षा में प्रवेश के लिए, अकरोत् = किया, एतावन्मन्दम् = इतना धीमा, विलुप्तत्वम् = खो जाना, अधिगतम् = प्राप्त होना, सप्तधा = सात बार, आहोस्वित् = अथवा, आयास्यति = आयेगा , अपि च = और।

## ifjHkkf"kd 'kCnkoY;k% ck/k%

1. **इसरो** – यह Indian Space Research Organisation यानी भारतीय अन्तरिक्ष अनुसन्धान संगठन का संक्षिप्त रूप है। जिसका मुख्यालय बङ्गलोर में है। संस्थान का मुख्य कार्य भारत के लिए अन्तरिक्ष सम्बन्धी तकनीकि उपलब्ध करवाना है ।
2. **मॉम–** (Mars Orbiter Mission = मंगल कक्षित्र मिशन – **भारतीय** मङ्गल**यान परियोजना का औपचारिक नाम ।**
3. **मैरिनर–9** – प्रथम अन्तरिक्ष विमान था जिसने किसी दूसरे ग्रह पर दस्तक दी । अमेरिकी अन्तरिक्ष यान मैरिनर–9, 30 मई 1971 को मंगल की कक्षा में प्रवेश किया।
4. **नासा–**National Aeronautics And Space Administration यानी राष्ट्रीय वैमानिकी और अन्तरिक्ष प्रबन्धन का संक्षिप्त रूप है । यह संयुक्त राज्य अमेरिका की सरकार की शाखा है जो अन्तरिक्ष अन्वेषण, वैज्ञानिक खोज तथा वैमानिकी संशोधन से सम्बद्ध है।
5. **मावेन–** (MAVEN) & Mars Atmostphere And Volatile Evolution का संक्षिप्त रूप है । नासा के द्वारा यह मङ्गल ग्रह के परिवेश का अध्ययन हेतु बनाया गया अन्तरिक्ष शोधयान है ।
6. **PSLV-C 25 –** Polar Satellite Launch Vehicle यानी ध्रुवीय उपग्रह प्रक्षेपण यान' का संक्षिप्त रूप है ।
7. **यान के मार्ग परिवर्तन में कठिनता के कारण –** मंगलयान की गति नियन्त्रण करना कठिन काम था, क्योंकि यदि यान की गति मंगल के गुरुत्वाकर्षण से कम हो जाती तो मङ्गल अपनी ओर यान को खींच लेता, जिससे मंगल की सतह से यान टकरा कर नष्ट हो जाता। और यदि गति अधिक तीव्र हो जाती तो यान मङ्गल की कक्षा से बाहर ही हो जाता। अतः मामला गुरुत्वाकर्षण से तालमेल बैठाने का था ।

# अभ्यासः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –

क. मङ्गलयानं कुतः विमुक्तम्?

ख. कः देशः स्वकीये प्रथमप्रयासे मङ्गलग्रहकक्षम् अलभत्?

ग. भारतस्य मङ्गलकार्यक्रमे कति धनानि व्ययीभूतानि?

घ. कतिधा मङ्गलयानस्य मार्गः परिवर्तितः?

ङ. के के देशाः मङ्गलग्रहकक्षं प्राप्तवन्तः?

2. कोष्ठात् शब्दान् चित्वा योजयत –

| |
|---|
| अन्तरिक्षे, मावेन, भारतस्य, अमेरिकायाः, भूमौ, मॉम, रुसस्य,<br>उपकरणानि, तैलानि, अन्तरिक्षान्वेषणस्य, विमानयात्रायाः, |

क. भारतस्य मङ्गलमिशन् इत्यस्य नाम ............ अस्ति ।

ख. 'मैरीनर–9' ............ देशस्य सफलः प्रयासः विद्यते ।

ग. मङ्गलयानेन सार्धं ............. प्रेषितानि ।

घ. मङ्गलयानकार्यक्रमः समग्र ............. प्रपञ्चस्य आदर्शभूतः ।

घ. मङ्गलमिशन् इत्यस्य साफल्येन .......... भारतस्य प्रभावः उत्कर्षतां प्राप्स्यति ।

3. अधोलिखितानां प्रश्नानां उत्तराणि हिन्दीभाषया लिखत –

क. मङ्गलमिशन् इत्यस्य मार्गस्य परिवर्तने का अवधेयता?

ख. अस्माकं मङ्गलयानस्य कानि प्रमुखोद्देश्यानि?

ग. किमर्थं मङ्गलकार्यक्रमः समग्र–अन्तरिक्षान्वेषणप्रपञ्चस्य आदर्शभूतः?

घ. अन्तरिक्षे अन्वेषमाणायाः संस्थायाः विषये लिखत ।

घ. ग्रहपरिवारे मङ्गलग्रहस्य का स्थितिः ?

4. पाठे प्रयुक्ताः संख्याः संस्कृते विलिख्य तदुत्तरवर्त्तीः संख्याः अपि लिखत–

उदाहरणम्– 20–विंशतिः, 21–एकविंशतिः।

51, 21, 1971, 450,

5. कः केन सम्बद्धः अस्ति। वाक्यं लिखत –

| | |
|---|---|
| 1. इसरो | 1. ध्रुवीयोपग्रहस्य प्रक्षेपकयानम् |
| 2. मॉम | 2. राष्ट्रीय–वैमानिकी अन्तरिक्ष–प्रबन्धञ्च |
| 3. मैरीनर–9 | 3. जीवनास्तित्वसूचकम् |
| 4. मावेन | 4. नासया निर्मितं शोधयानम् |
| 5. PSLV C–25 | 5. भारतीयान्तरिक्ष–अनुसन्धान–संगठनेन |
| 6. नासा | 6. सतीशधवनान्तरिक्षकेन्द्रेण |
| 7. हरिकोटा | 7. प्रथमः सफलः प्रयासः |
| 8. मीथेन | 8. मार्स ऑबिटर मिशन् इत्यनेन |

–––000–––

R5IGBC

# व्याकरणखण्ड

## शब्द रूप

मूल धातु, प्रत्यय, उपसर्ग, को छोड़कर सार्थक शब्द प्रातिपदिक कहलाते हैं। प्रातिपदिकों के अन्त में पद निर्माण के लिए सुप् और तद्धित प्रत्यय लगाए जाते हैं। संज्ञा एवं सर्वनाम शब्दों के साथ लगने वाले कारक चिह्न को सुप् प्रत्यय तथा क्रिया रूप बनाने के लिए धातुओं के साथ लगने वाले प्रत्ययों को तिङ्. प्रत्यय कहते हैं।

R5SCCZ

प्रातिपदिक शब्द दो प्रकार के होते है –

(i) अजन्त अर्थात् स्वरान्त (जिनके अन्त में स्वर होते हैं।)

जैसे – राम, हरि, गुरु, गौ आदि।

(ii) हलन्त अर्थात् व्यञ्जनान्त (जिनके अन्त में व्यञ्जन होते हैं।)

जैसे – वाच्, भगवत्, महत्, सरस्, सखिन् आदि।

### अजन्त पुल्लिङ्ग

### 1. अकारान्त पुल्लिङ्ग

#### जनक (पिता)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | जनकः | जनकौ | जनकाः |
| द्वितीया | जनकम् | जनकौ | जनकान् |
| तृतीया | जनकेन | जनकाभ्याम् | जनकैः |
| चतुर्थी | जनकाय | जनकाभ्याम् | जनकेभ्यः |
| पञ्चमी | जनकात् | जनकाभ्याम् | जनकेभ्यः |
| षष्ठी | जनकस्य | जनकयोः | जनकानाम् |
| सप्तमी | जनके | जनकयोः | जनकेषु |
| सम्बोधन | हे जनक! | हे जनकौ! | हे जनकाः |

**समान शब्द** – राम, नृप, बक, भुजंग, छात्र, द्विज, नर, मानव आदि।

## 2. इकारान्त पुल्लिङ्ग

### कवि

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पञ्चमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधन | हे कवे! | हे कवी! | हे कवयः |

समान शब्द – मुनि, विधि, रश्मि, अग्नि, कपि, गिरि, निधि आदि।

## 3. उकारान्त पुल्लिङ्ग

### शिशु (बालक)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शिशुः | शिशू | शिशवः |
| द्वितीया | शिशुम् | शिशू | शिशून् |
| तृतीया | शिशुना | शिशुभ्याम् | शिशुभिः |
| चतुर्थी | शिशवे | शिशुभ्याम् | शिशुभ्यः |
| पञ्चमी | शिशोः | शिशुभ्याम् | शिशुभ्यः |
| षष्ठी | शिशोः | शिश्वोः | शिशूनाम् |
| सप्तमी | शिशौ | शिश्वोः | शिशुषु |
| सम्बोधन | हे शिशो! | हे शिशू! | हे शिशवः |

समान शब्द – बिन्दु, वायु, गुरू, बन्धु, भानु, बाहु, प्रभु, ऋतु, भानु, साधु आदि।

## इकरान्त पुल्लिङ्ग

### सखि (मित्र)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सखा | सखायौ | सखायः |
| द्वितीया | सखायम् | सखायौ | सखीन् |
| तृतीया | सख्या | सखिभ्याम् | सखिभिः |
| चतुर्थी | सख्ये | सखिभ्याम् | सखिभ्यः |
| पञ्चमी | सख्युः | सखिभ्याम् | सखिभ्यः |
| षष्ठी | सख्युः | सख्योः | सखीनाम् |
| सप्तमी | सख्यौ | सख्योः | सखिषु |
| सम्बोधन | हे सखे! | हे सखायौ! | हे सखायः! |

## इकारान्त स्त्रीलिङ्ग

### प्रीति – प्रेम

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्रीतिः | प्रीती | प्रीतयः |
| द्वितीया | प्रीतिम् | प्रीती | प्रीतीः |
| तृतीया | प्रीत्या | प्रीतिभ्याम् | प्रीतिभिः |
| चतुर्थी | प्रीत्यै, प्रीतये | प्रीतिभ्याम् | प्रीतिभ्यः |
| पञ्चमी | प्रीत्याः, प्रीतेः | प्रीतिभ्याम् | प्रीतिभ्यः |
| षष्ठी | प्रीत्याः, प्रीतेः | प्रीत्योः | प्रीतीनाम् |
| सप्तमी | प्रीत्याम्, प्रीतौ | प्रीत्योः | प्रीतिषु |
| सम्बोधन | हे प्रीते! | हे प्रीती! | हे प्रीतयः! |

**समान शब्द** – श्रुति, भूति, गति, स्तुति, प्रकृति, रूचि आदि।

## ईकारान्त स्त्रीलिङ्ग

### कुमारी

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कुमारी | कुमार्यौ | कुमार्यः |
| द्वितीया | कुमारीम् | कुमार्यौ | कुमारीः |
| तृतीया | कुमार्या | कुमारीभ्याम् | कुमारीभिः |
| चतुर्थी | कुमार्यै | कुमारीभ्याम् | कुमारीभ्यः |
| पञ्चमी | कुमार्याः | कुमारीभ्याम् | कुमारीभ्यः |
| षष्ठी | कुमार्याः | कुमार्योः | कुमारीणाम् |
| सप्तमी | कुमार्याम् | कुमार्योः | कुमारीषु |
| सम्बोधन | हे कुमारि! | हे कुमार्यौ! | हे कुमार्यः |

**समान शब्द –** पुत्री, नारी, जननी, पत्नी, विदुषी, पृथ्वी, रजनी, कदली, आदि।

## ऋकारान्त स्त्रीलिङ्ग

### स्वसृ (बहन)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | स्वसा | स्वसारौ | स्वसारः |
| द्वितीया | स्वसारम् | स्वसारौ | स्वसृः |
| तृतीया | स्वस्रा | स्वसृभ्याम् | स्वसृभिः |
iv. अनुवाद में धातुरूपों का विशेष महत्व है। पहले तो यह पता होना चाहिए कि अमुक धातु किस गण की है। दूसरे, इस बात का ज्ञान होना चाहिए कि यह धातु परस्मैपदी है, आत्मनेपदी है या उभयपदी है। फिर जिस काल या अवस्था का निर्देश है,उसके अनुसार कौन से लकार का प्रयोग होना चाहिए। किन्तु इतने मात्र से काम नहीं चलेगा। अन्त में हमें यह देखना है कि वाक्य कर्तृवाच्य में है या कर्मवाच्य में है या भाववाच्य में। जिस पुरुषतथा वचन का कर्ता होगा, क्रिया–रूप भी उसी पुरुष तथा वचन का होगा।

v. अनुवाद में णिजन्त (प्रेरणार्थक क्रिया) कृदन्त शब्द एवं उपसर्ग आदि ज्ञान भी आवश्यक है। धातुओं के पूर्व उपसर्ग कैसे लगाया जाता है तथा उसके पश्चात् धातुरूप से पहले उपसर्ग लगाया जाता है, जैसे गम् धातु का ल् लकार प्रथमपुरुष एकवचन में अगच्छत् रूप बन जाने पर इसके पूर्व प्रति तथा आ उपसर्ग लगाने से प्रत्यागच्छत् (प्रति + आ + अगच्छत्) रूप बनेगा। ऐसे ही कृदन्तरूपों में यदि क्त्वा का रूप हो तथा उससे पूर्व उपसर्ग आ गया हो, तो क्त्वा का ल्यप् हो जायेगा। श्रु धातु से क्त्वा में 'श्रुत्वा' रूप बनता है परन्तु इसके पूर्व 'प्रति' उपसर्ग आने से ' प्रतिश्रुत्य' रूप हो जायेगा।

vi. अनुवाद में कारक, विभक्तियों तथा उपपद–विभक्तियों का भी ध्यान रखना चाहिए।

vii. क्रिया – विशेषण शब्द अव्यय होते हैं। उनके रूपों में कोई परिवर्तन नहीं होता।

viii. अनुवाद को उत्तम बनाने के लिए हम वाक्य में संस्कृत शब्दों के बीच में संधि कर सकते हैं। जैसे –रामः विद्यालयमागच्छत्। 'विद्यालयम्' और आगच्छत् में संयोग किया गया है।

### अनुवाद अभ्यास–

| | | |
|---|---|---|
| 1. बालक हँसता है। | – | बालकः हसति। |
| 2. बालक सूँघते हैं। | – | छात्राः जिघ्रन्ति। |
| 3. वह देता है। | – | सः ददाति। |
| 4. वे दोनों सहन करते हैं। | – | तौ सहेते। |
| 5. तुम प्रसन्न होते हो। | – | त्वं मोदसे। |
| 6. मैं नदी में तैरता हूँ। | – | अहं नदीं तरामि। |
| 7. आप कहाँ रहते हैं ? | – | भवान् कुत्र निवसति ? |
| 8. मुझसे पाठ पढा जाता है। | – | मया पाठः पठ्यते। |
| 9. हम सब भारतवासी हैं। | – | वयं सर्वे भारतवासिनः स्मः। |
| 10. तुम दीनों पर दया करो | – | त्वं दीनान् प्रति दयां कुरू। |
| 11. परीक्षा के बिना डिग्री कैसी? | – | परीक्षां विना उपाधिपत्रं कीदृशम्? |
| 12. मुझे संस्कृत पढ़ना अच्छा लगता है। | – | मह्यं संस्कृतपठनं रोचते। |
| 13. आपका स्वागत है। | – | भवते/भवत्यै स्वागतम्। |
| 14. तू कहाँ से आता है। | – | त्वं कुतः आगच्छसि। |
| 15. तुम थोड़ी देर बाद यहाँ आना | – | त्वं क्षणात् पश्चात्/अनन्तरम् अत्र आगच्छ। |
| 16. वह पढ़ने के कारण रहता है। | – | सः पठनस्य हेतोः वसति। |
| 17. कचहरी के समीप स्टेशन है। | – | न्यायालयस्य अन्तिकं यानस्थानकम् अस्ति। |
| 18. वह धन कमाने में लगा है। | – | सः धनार्जने रतः अस्ति। |
| 19. छात्रों में मोहन होशियार है। | – | छात्रेषु मोहनः पटुतमः। |
| 20. मेज पर पुस्तकें है। | – | पटले पुस्तकानि सन्ति। |
| 21. चार लड़के नहीं आए। | – | चत्वारः बालकाः न आगच्छन्। |
| 22. फरवरी में अठ्ठाइस दिन होते हैं। | – | फरवरी मासे अष्टाविंशतिः दिनानि भवन्ति। |
| 23. मेरे पास चार वस्तुएँ हैं। | – | मम समीपे चत्वारि वस्तूनि सन्ति। |
| 24. उसका क्या नाम था? | – | तस्य किं नाम आसीत्? |
| 25. तुम्हारे पास पढ़ने का समय है। | – | तव समीपे पठितुं समयः अस्ति। |
| 26. तुम्हें वहाँ जाना चाहिए। | – | त्वया तत्र गन्तव्यम्। |

27. पढ़ने के समय पढ़ना चाहिए। – पठनकाले पठितव्यम्।
28. यथाशक्ति सबकी सेवा करनी चाहिए– यथाशक्ति सर्वे सेवितव्याः।
29. वह चित्र देखकर आया है। – सः चित्रं दृष्ट्वा समागतः।
30. छात्र पुस्तक लाते हैं। – छात्राः पुस्तकं आनयन्ति।
31. मैं पिता के चरण छूता हूँ। – अहं पितुः चरणौ स्पृशामि।
32. हम आँखों से देखते हैं। – वयं चक्षुभ्यां पश्यामः।
33. लोभ से विद्या का नाश होता है। – लोभेन विद्या नश्यते।
34. मनुष्य सुख के लिए धन कमाता है।– मनुष्यः सुखाय धनम् अर्जति।
35. मैं प्यासे को जल देता हूँ। – अहं पिपासवे जलं ददामि।
36. वह घर से बाहर जाता है। – सः गृहात् बहिः गच्छति।
37. बादलों से बूँदे गिरती है। – मेघेभ्यः बिन्दवः पतन्ति।
38. स्कूल का कार्य पहले करो। – विद्यालयस्य कार्यं प्रथमं कुरू।
39. घर में कुत्ता भी शेर होता है। – गृहे कुक्कुरोऽपि सिंहायते।
40. राम! तुम्हारी माता कहाँ है ? – राम! तव माता कुत्र अस्ति ?
41. उसने मुझसे मार्ग पूछा। – सः मां मार्गम् अपृच्छत्।
42. इस वर्ष वर्षा होगी। – अस्मिन् वर्षे वृष्टिः भविष्यति।
43. हम भी एक प्रश्न पूछेंगे। – वयमपि एकं प्रश्नं प्रक्ष्यामः।
44. तुम्हारी परीक्षा कब होगी? – तव परीक्षा कदा भविष्यति?
45. वह बुरी आदत छोड़े। – सः दुर्व्यसनं त्यजेत्।
46. हमारा देश यशस्वी हो। – अस्माकं देशः यशस्वी भवेत्।
47. शिक्षक छात्र को पढ़ाता है। – शिक्षकः छात्रं पाठयति।
48. शोर बन्द करो। – अलं कोलाहलेन।
49. बुद्धि बल से श्रेष्ठ है। – मतिः बलाद् गरीयसी।
50. उतना अन्न खाओ जितना हजम हो सके। – तावन्तम् अन्नं भक्षय यावन्तं सुपाच्यम्।

————0000————

# वाच्य प्रकरण

1. नीचे लिखे वाक्यों को ध्यान से पढ़िए—

| क | ख |
|---|---|
| (i) अनुजः पाठं पठति। | अनुजेन पाठः पठ्यते। |
| (ii) सः लेखं लिखति। | तेन लेखः लिख्यते। |
| (iii) रमा भोजनं पचति। | रमया भोजनं पच्यते। |
| (iv) सा भोजनं खादति। | तया भोजनं खाद्यते। |
| (v) तौ पुस्तकं पठतः। | ताभ्यां पुस्तकं पठ्यते। |
| (vi) त्वं पुष्पाणि चिनोषि। | त्वया पुष्पाणि चीयन्ते। |
| (vii) सः तौ पश्यति। | तेन तौ दृश्येते। |
| (viii) आवां गीतं गायावः। | आवाभ्यां गीतं गीयते। |
| (ix) वयं चन्द्रमसं ध्यायामः। | अस्माभिः चन्द्रमाः ध्यायते। |
| (x) अहं सूर्यं पश्यामि। | मया सूर्यः दृश्यते। |
| (xi) बालकः वृक्षान् गणयति। | बालकेन वृक्षाः गण्यन्ते। |

यहाँ 'क' खण्ड में जो वाक्य है वे कर्तृवाच्य में हैं और 'ख' में जो वाक्य हैं वे कर्मवाच्य के हैं। इन दोनों खण्डों में क्या भेद है ? इसे जाने—

**वाच्यम्**

| कर्तृवाच्य | | | कर्मवाच्य | | |
|---|---|---|---|---|---|
| सः | लेखं | लिखति। | तेन | लेखः | लिख्यते। |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| कर्ता | कर्म | क्रिया | कर्ता | कर्म | क्रिया |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| प्रथमा | द्वितीया | कर्तृपदानुरूपा | तृतीया | प्रथमा | कर्मपदानुरूपा |

## कर्तृवाच्य से कर्मवाच्य में परिवर्तन करने के नियम—

I. कर्तृवाच्य के कर्ता की प्रथमा विभक्ति के स्थान पर कर्मवाच्य में तृतीया विभक्ति की जाती है।

II. कर्तृवाच्य के कर्म की द्वितीया विभक्ति के स्थान पर कर्मवाच्य में प्रथमा विभक्ति की जाती है।

III. कर्मवाच्य में क्रिया का पुरुष/वचन तथा लिंग विभक्ति कर्म के पुरुष और वचन तथा लिंग/विभक्ति के अनुसार हो जाता है।

IV. कर्तृवाच्य में क्तवतु (तवत्) प्रत्यय के स्थान पर कर्मवाच्य में क्त (त) प्रत्यय हो जाता है। जैसे–

| कर्तृवाच्य | कर्मवाच्य |
|---|---|
| सः पाठं पठति। | तेन पाठः पठ्यते। |
| त्वं गीतं गीतवान्। | त्वया गीतं गीतम्। |
| सः मां पश्यति। | तेन अहं दृश्ये। |
| त्वं पुष्पाणि चिनोषि। | त्वया पुष्पाणि चीयन्ते। |

## कर्मवाच्य से कर्तृवाच्य में परिवर्तन के नियम–

I. कर्मवाच्य मे कर्त्ता की तृतीया विभक्ति कर्तृवाच्य में प्रथमा विभक्ति में बदल जाती हैं।

II. कर्मवाच्य में कर्मकारक की प्रथमा विभक्ति कर्तृवाच्य में द्वितीया विभक्ति में बदल जाती है।

III. क्रिया के पुरुष व वचन कर्म के अनुसार न होकर कर्त्ता के अनुसार होते हैं। क्रिया आत्मने पद से परस्मैपद में बदल दी जाती है।

IV. कर्मवाच्य में प्रयुक्त क्त प्रत्यय की जगह कर्तृवाच्य में क्तवतु प्रत्यय होता है। जैसे–

| कर्मवाच्य | कर्तृवाच्य |
|---|---|
| मया त्वं दृश्यसे। | अहं त्वां पश्यामि। |
| तेन यूयं दृश्यध्वे। | सः युष्मान् पश्यति। |
| मया त्वम् आहूयसे। | अहं त्वाम् आह्वयामि। |

## नीचे लिखे वाक्यों में कर्तृवाच्य और कर्मवाच्य को चुनकर पृथक–पृथक कीजिए–

(क) उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

(ख) सर्पाः पवनं पिबन्ति।

(ग) विद्वान् सर्वैः पूज्यते।

(घ) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(ङ) विद्या विनयं ददाति।

(च) बुभुक्षितैः व्याकरणं न भुज्यते न पीयते काव्यरसः पिपासुभिः।

(छ) मत्तदन्तिनः रज्वा बध्यन्ते।

(ज) बालकेन (जलेन) घटः पूर्यते।

3. अधोलिखित वाक्यों में कर्तृपद को कर्मवाच्य में परिवर्तन कर लिखिए—

| यथा भक्तः गीतां पठति | भक्तेन गीता पठ्यते। |
|---|---|
| (क) शिष्याः गुरून् नमन्ति। | ...................... गुरवः नम्यन्ते। |
| (ख) पुत्रः जनकं सेवते। | ...................... जनकः सेव्यते। |
| (ग) अहं पत्रं लिखामि। | ...................... पत्रं लिख्यते। |
| (घ) त्वं कवितां श्रृणोषि। | ...................... कविता श्रूयते। |

4. अधोलिखित वाक्यों में कर्मपद को परिवर्तित कर लिखिए—

| यथा अहं लोभं त्यजामि। | मया लोभः त्यज्यते। |
|---|---|
| (क) आचार्याः छात्रान् उपदिशन्ति। | आचार्याः ..................उपदिश्यन्ते। |
| (ख) जनाः प्रदर्शनीं पश्यन्ति। | जनैः ............................. दृश्यते। |
| (ग) त्वं पुरस्कारं गृह्णासि। | त्वया .............................गृह्यते। |
| (घ) छायाकारः छायाचित्रं रचयति। | छायाकारेण .................. रच्यते। |

5. कर्मवाच्य के वाक्यों में क्रिया पदों को लिखकर रिक्त स्थानों की पूति कीजिए—

| यथा—मेघाः जलं वर्षन्ति | मेघैः जलं वृष्यते। |
|---|---|
| (क) उपकारी मानं न अभिलषति। | उपकारिणा मानः न ................. । |
| (ख) राष्ट्रपतिः राष्ट्रं सम्बोधयति। | राष्ट्रपतिना राष्ट्रं ........................ । |
| (ग) छात्राः शिक्षिकाम् अभिनन्दन्ति। | छात्राभिः शिक्षिका ........................ । |
| (घ) प्रधानमंत्री वैज्ञानिकान् सम्मानयति। | प्रधानमन्त्रिणा वैज्ञानिकाः ............... । |

4. सुधा एक स्वस्थ कन्या है। उसकी दिनचर्या नियमित है। इसकी दिनचर्या जानकर नीचे मञ्जूषा से क्रिया पदों को चुनकर रिक्त स्थान की पूर्ति कीजिए–

**क्षाल्यन्ते, आरोपयन्ते, उद्यते, पीयते, गृह्यते, पठ्यते, खाद्येते, क्रियते स्मर्यते।**

I. सुधया प्रत्युषे उद्यानं गत्वा व्यायामः .................................... ।

II. सुधया प्रातः दुग्धं ............................................ ।

III. सुधया नित्यं दुग्धेन सह कदलीफले अपि .............................. ।

IV. सुधया भोजने सन्तुलिताहारः .............................. ।

V. सुधया स्ववाटिकायां वृक्षाः .............................. ।

VI. सुधया स्ववस्त्राणि स्वयं.............................. ।

VII. सुधया नित्यं समये.............................. ।

VIII. सुधया सायमपि ईश्वरः .............................. ।

IX. सुधया कदापि असत्यं न .............................. ।

## भाववाच्य

1. नीचे लिखे वाक्यों को ध्यान से पढ़िए–

| (क) कर्तृवाच्य | (ख) भाववाच्य |
|---|---|
| (i) बालकः क्रीडति। | बालकेन क्रीड्यते। |
| (ii) शिशुः स्वपिति। | शिशुना सुप्यते। |
| (iii) छात्राः तिष्ठन्ति। | छात्रैः स्थीयते। |
| (iv) कन्याः हसन्ति | कन्याभिः हस्यते। |
| (v) अश्वाः धावन्ति। | अश्वैः धाव्यते। |

इन वाक्यों में हमने देखा कि–

(1) कर्तृपद है।

(2) क्रिया पद भी है परन्तु कर्मपद नहीं है।

इन वाक्यों में किन धातुओं का प्रयोग है?

क्रीड्, स्वप्, स्था, हस्, धाव्, इन धातुओं का प्रयोग है। ये धातुएँ अकर्मक हैं।

इससे ज्ञात होता है कि यहाँ अकर्मक धातुओं का प्रयोग है। अर्थात् यहाँ कर्मपद नहीं है। अकर्मक धातु के योग में कर्तृवाच्य एवं भाववाच्य होते हैं। अब हम भाववाच्य के नियम जानें–

1. कर्तृपद में तृतीया विभक्ति होती है। कर्तृपद के विशेषण में भी तृतीया विभक्ति होती है।
2. भाववाच्य मे अकर्मक धातुओं का ही प्रयोग होता है।
3. भाववाच्य में बहुवचन भी क्रियापद हमेशा प्रथम पुरुषएक वचन में ही प्रयुक्त होता है।
4. भू, अस्, स्था, स्वप्, शीङ्, हस्, क्रीड्, इत्यादि धातुएं अकर्मक है।

**भाववाच्य में**

कर्ता — तृतीया विभक्ति में होता है।

कर्म नहीं होता है

क्रिया — प्रथम पुरुषएकवचन में होती है।

**2. उदाहरण के अनुसार नीचे लिखे वाक्यों को भाववाच्य में परिवर्तन कीजिए –**

| कर्तृवाच्य | भाववाच्य |
|---|---|
| यथा – बालकाः हसन्ति (हस्) | बालकैः हस्यते। |
| (i) शिशुः रोदिति (रूद्) | (i) .......................................... । |
| (ii) छात्राः अत्र तिष्ठन्ति (स्था) | (ii) ........................................ । |
| (iii) सिंहः वने गर्जति (गर्ज्) | (iii) ....................................... । |
| (iv) अलसः दिने स्वपिति (स्वप्) | (iv) ........................................ । |
| (v) वानराः वृक्षेषु कूर्दन्ति (कूर्द) | (v) .......................................... । |
| (vi) लता वर्धते (वृध्) | (vi) ........................................ । |

**2. कोष्ठक से उचित पद चुनकर रिक्त स्थान की पूर्ति कीजिए–**

I. कर्तृवाच्य विद्याहीनाः न शोभन्ते।

विद्याहीनैः न .......................... ।(शुभ्यते/शोभ्यते)

II. विमानम् उड्डयते।

विमानेन ................................. । (उड्डीयते/उड्डयते)

III. सज्जनाः उपविशन्ति।

सज्जनै : .................................. । (उपविश्यन्ते/उपविश्यते)

IV. वृक्षाः कम्पन्ते।

वृक्षै : .................................. । (कम्प्यते/कम्प्यन्ते)

V. विद्यार्थिनः धावन्ति।

विद्यार्थिभिः .................................. । (धाव्यते/धाव्यन्ते)

### (1) वाच्य के तीन प्रकार हैं–

I. कर्तृवाच्य

II. कर्मवाच्य

III. भाववाच्य

(2) कर्तृवाच्य में क्रिया का कर्ता के साथ सम्बन्ध होता है। जबकि कर्मवाच्य में क्रिया का कर्म के साथ सम्बन्ध होता है।

(3) भाववाच्य में कर्म नहीं होता है।

(4) कर्तृवाच्य में (सकर्मक धातु के योग में) कर्तापद प्रथमा विभक्ति में, कर्मपद द्वितीया विभक्ति में और क्रिया पद कर्ता पद के पुरुष एवं वचन के अनुसार होगी।

(5) कर्मवाच्य में कर्ता तृतीया विभक्ति में, कर्म प्रथमा विभक्ति में और क्रिया कर्म के अनुसार होती है।

(6) भाववाच्य में कर्ता तृतीया विभक्ति में होता है। क्रिया सदा प्रथम पुरुष एक वचन में होती है। कर्ता बहुवचन मे होने पर भी क्रिया परिवर्तित नहीं होती।

(7) कर्मवाच्य एवं भाववाच्य के क्रियापद निर्माण में मूलधातु के साथ 'य' जुड़ता है तथा मूलधातु + य + ते (पठ्यते, लिख्यते, सेव्यते)। सभी धातुओं के रूप आत्मने पद में ही होते हैं।

-----0000----

# उपसर्ग–प्रकरण

उपसर्ग शब्द का अर्थ 'समीप' होता है जो क्रियाओं (धातुओं) के पूर्व में लगकर उसके अर्थ में परिवर्तन ला देता है। " उपसृज्यन्ते धातूनां समीपे क्रियन्ते इति उपसर्गाः। "

संस्कृत में उपसर्गो की संख्या 22 है जिनका अर्थ सहित विवरण इस प्रकार है–

| उपसर्ग | | प्रचलित अर्थ |
|---|---|---|
| 1. प्र | – | अधिक, उत्कर्ष, गति, यश, उत्पत्ति, आगे। |
| 2. परा | – | उलटा, पीछे, अनादर, नाश। |
| 3. अप | – | लघुता, हीनता। |
| 4. सम् | – | अच्छा, पूर्ण, साथ। |
| 5. अनु | – | पीछे, निम्न, समान, क्रम। |
| 6. अव | – | अनादर, हीनता, पतन, विशेषता। |
| 7. निस् | – | रहित, पूरा, विपरीत। |
| 8. निर् | – | बिना, बाहर, निषेध। |
| 9. दुस् | – | बुरा, कठिन। |
| 10. दुर् | – | कठिनता, दुष्टता, निन्दा, हीनता। |
| 11. वि | – | भिन्नता, हीनता, असमानता, विशेषता। |
| 12. आ | – | तक, समेत, उलटा। |
| 13. नि | – | निषेध, निश्चित अधिकता। |
| 14. अधि | – | ऊपर, श्रेष्ठ, समीपता, उपरिभावादि। |
| 15. अपि | – | निकट। |
| 16. सु | – | उत्तमता, सुगमता, श्रेष्ठता। |
| 17. उत् | – | ऊँचा, श्रेष्ठ, ऊपर। |
| 18. अभि | – | सामने, पास, अच्छा, चारों ओर। |
| 19. परि | – | आस पास, सब तरफ, पूर्णता। |
| 20. उप | – | निकट, सदृश, गौण, सहायता, लघुता। |
| 21. अति | – | अत्यधिक। |
| 22. प्रति | – | विरोध की ओर। |

| क्र. | उपसर्ग | क्रिया पद | बने शब्द | अर्थ |
|---|---|---|---|---|
| 1 | प्र | भवति<br>चरति | प्रभवति<br>प्रचरति | उत्पन्न होता है।<br>प्रचार होता है। |
| 2 | परा | भवति<br>अयते | पराभवति<br>पलायते | हारता है।<br>भागता है। |
| 3 | अप | दिशति<br>वदति | अपदिशति<br>अपवदति | बहाना करता है।<br>निन्दा करता है। |
| 4 | सम् | क्षिपति<br>दिशति | संक्षिपति<br>संदिशति | समेटता है।<br>संदेश देता है। |
| 5 | अनु | मन्यते<br>भवति | अनुमन्यते<br>अनुभवति | राय देता है।<br>अनुभव करता है। |
| 6 | अव | तरति<br>गच्छति | अवतरति<br>अवगच्छति | अवतार लेता है, नीचे उतरता है।<br>जानता है। |
| 7 | निस् | चिनोति<br>दिशति | निश्चिनोति<br>निर्दिशति | निश्चय करता है।<br>बतलाता है। |
| 8. | निर् | अयते<br>ईक्षते | निलयते<br>निरीक्षते | छिपता है।<br>निगरानी करता है। |
| 9. | दुस् | अयते<br>चरति | दुरयते<br>दुश्चरति | दुखी होता है।<br>बुरा काम करता है। |
| 10. | दुर् | नयति<br>वक्ति | दुर्णयति<br>दुर्वक्ति | अन्याय करता है।<br>गाली देता है। |
| 11. | वि | लपति<br>तरति | विलपति<br>वितरति | रोता है, विलाप करता है।<br>बाँटता है। |
| 12. | आ | ददति<br>रोहति | आददाति<br>आरोहति | लेता है।<br>चढ़ता है। |
| 13 | नि | दिशति<br>दधे | निदिशति<br>निदधे | आज्ञा देता है।<br>विश्वास करता हूँ। |
| 14 | अधि | करोति<br>क्षिपति | अधिकरोति<br>अधिक्षिपति | अधिकार करता है।<br>निन्दा करता है। |
| 15 | अपि | धत्ते | अपिधत्ते | ढाँकता है। |
| 16 | अति | रिच्यते<br>एति | अतिरिच्यते<br>अत्येति | बढ़ता है।<br>नष्ट होता है। |
| 17 | सु | करोति<br>नयति | सुकरोति<br>सुनयति | पुण्य करता है।<br>अच्छा काम करता है। |
| 18 | उत् | तिष्ठति<br>पतति | उत्तिष्ठति<br>उत्पतति | उठता है।<br>उड़ता है। |
| 19 | अभि | जानाति<br>धीयते | अभिजानाति<br>अभिधीयते | पहचानता है।<br>कहा जाता है। |
| 20 | प्रति | जानाति<br>वदति | प्रतिजानाति<br>प्रतिवदति | प्रतिज्ञा करता है।<br>जवाब देता है। |

| | | | | |
|---|---|---|---|---|
| 21 | परि | हरति<br>वर्तन्ते | परिहरति<br>परिवर्तन्ते | दूर करता है।<br>घूमते हैं। |
| 22 | उप | विशामि<br>दिशति | उपविशामि<br>उपदिशति | बैठता हूँ।<br>उपदेश देता है। |

## अभ्यासः

1. निम्नलिखित क्रिया पदों से उपसर्ग एवं धातु अलग कीजिए –

| क्र. | क्रिया पद | उपसर्ग | धातु |
|---|---|---|---|
| | अभिनन्देत्<br>परिज्ञायते<br>अनुधावामि<br>अनुवर्तसे<br>आगच्छथः<br>उच्चरन्ति | | |

2. प्रत्येक उपसर्ग से दो सार्थक शब्द बनाइये :–

I. अव .................................... ......................................
II. परा ................................... ......................................
III. सम् .................................... ......................................
IV. सु .................................... ......................................
V. दुर् .................................... ......................................

3. ' हृ ' धातु में विभिन्न प्रत्यय जोड़ने पर इस प्रकार शब्द बनेंगें–

| उपसर्ग | धातु | क्रिया पद | अन्य पद |
|---|---|---|---|
| प्र | हृ. | प्रहरति | प्रहारः |
| आ | हृ | आहरति | आहारः |
| सम् | हृ | संहरति | संहारः |
| वि | हृ | विहरति | विहारः |

इसी प्रकार निम्नलिखित उपसर्गो में गम् धातु जोड़कर विभिन्न शब्द बनाइयेः–

| उपसर्ग | धातु | क्रिया पद | अन्य पद |
|---|---|---|---|
| अनु | गम् | ................................ | अनुगामी |
| उप | गम् | .............................. | ...................... |
| अव | गम् | ............................ | ....................... |
| आ | गम् | .............................. | .......................... |
| निर् | गम् | .............................. | निर्गतः |

————0000————

# अपठित गद्यांश

संस्कृत भाषा में छात्रों की मौलिक अभिव्यक्ति क्षमता, भावप्रवणता, शब्द भण्डार एवं स्वाभाविक चिन्तनशीलता के विकास के लिए पाठ्य पुस्तक में निहित गद्य पाठों के अतिरिक्त कुछ अपठित गद्यांश दिये जा रहे हैं। विषय अध्यापक इन गद्यांशों को आधार मानकर अन्य अपठित गद्यांशों का अभ्यास छात्रों को करा सकेंगे।

अपठित गद्यांश के अन्तर्गत गद्यांश का उपयुक्त शीर्षक लेखन, सारांशीकरण, भावार्थ प्रकटीकरण तथा प्रश्नों को समझकर सही उत्तर संस्कृत में लिख सकेंगे।

## गद्यांश–1.

अस्माकं जीवने यः समयः अतीतः स तु गतः, अतः तस्य विषये चिन्ता न करणीया। अवशिष्टं जीवनं सार्थकं कुर्याम। दिने–दिने स्वार्थः न्यूनः भवेत्, परार्थः अधिकाधिकः भवेत्। अस्मिन्नेव सुखस्य रहस्यमस्ति। स्वस्मै स्वल्पं, समाजाय सर्वस्वम् इति उक्तेः अनुसारं जीवने एव जीवनस्य सार्थकता अस्ति। एवं जगत् इतः अपि सुन्दरतरं भवेत्।

### प्रश्नाः

**1. एकपदेन उत्तरत–**

- I. प्रतिदिनं कः न्यूनः भवेत् ?
- II. प्रतिदिनं कः अधिकाधिकः भवेत् ?
- III. वयं कस्मै सर्वस्वम् अर्पयाम ?
- IV. इतः अपि सुन्दरतरं किं भवेत् ?

**2. पूर्णवाक्येन उत्तरत–**

जीवनस्य सार्थकता कस्याः उक्तेः अनुसारं जीवने अस्ति ?

**3. यथानिर्देशं उत्तरत–**

- I. 'अतीतः' इति पदस्य किं समानार्थकं पदम् अत्र प्रयुक्तम् ?
- II. 'अवशिष्टम्' इति पदं कस्य पदस्य विशेषणम् ?
- III. 'तस्य विषये' इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
- IV. 'अस्मात्' इति स्थाने किम् अव्यय पदं प्रयुक्तम् ?

## गद्यांश–2

मातृभूमिः बहुविधैः द्रव्यैः अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा धनेन च स्वमातृभूमेः उन्नतिं कुर्याम। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत्। अतएव कथितम्–'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' ।

## प्रश्नाः

### 1. एकपदेन उत्तरत–

I. का अस्मान् उपकरोति ?

II. वयं कस्याः उन्नतिं कुर्याम ?

### 2. निर्देशानुसारम् उत्तरत–

I. 'द्रव्यैः' अस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?

II. 'वयम्' अस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

III. 'अवनतिम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

IV. 'तस्यै अस्माकं कर्तव्यम् अस्ति' अस्मिन् वाक्ये तस्यै इति सर्वनामपदं कस्मै प्रयुक्तम् ?

### 3. पूर्णवाक्येन उत्तरत–

I. मातृभूमिः कथम् अस्मान् उपकरोति ?

II. मातृभूम्यै अस्माकं किं कर्तव्यम् अस्ति ?

III. गद्यांशस्य उपयुक्तशीर्षकं चिनुत?

IV. गद्यांशस्य सारांशीकरणं कुरूत ?

## गद्यांश 3

संसारे कोऽपि बालः न जानाति यत् कि सद्वृत्तम् किं च असद्वृतम्। बालस्तु ज्येष्ठान् वृद्धान च पश्यति। ते वयोवृद्धाः यथा–यथा आचरन्ति बालोऽपि तथैव आचरति। शिष्टानां वंशेषु वृद्धाः युवानः बालाः, महिलाश्च सर्वे परस्परं सभ्यतायाः आलपन्ते, ते अन्योन्यं सम्मानयन्ति। अशिष्टानां वंशेषु तु एतादृशः व्यवहारः न दृश्यते।

## प्रश्नाः

### 1. एकपदेन उत्तरत–

(1) केषां वंशेषु सर्वे सभ्यतायाः आलपन्ते ?

(2) कः सद्वृत्तम् असद्वृतं च न जानाति ?

### 2. पूर्णवाक्येन उत्तरत–

I. बालः कान् कान् पश्यति ?

II. बालाः कथं आचरन्ति ?

### 3. निर्देशानुसारम् उत्तरत–

I. 'जानाति' अस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?

II. 'तथा' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

III. 'सदाचरणम्' इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?

IV. 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

## गद्यांश 4

दुर्लभमेतत् मानुषं जन्म पुरुषार्थचतुष्टस्य साधनम्। सर्वेषां कामानामाप्तिः धर्माचरणञ्च पुनः शरीरेणैव मानवः कर्तुं शक्नोति। शरीरमेव आत्मनः निवासस्थानम्। मानवः स्वव्यक्तित्वानुरूपमेव निवासस्थानमिच्छति एवं ह्यात्मनापि स्वस्थं शरीरमेवाभिलष्यते। केनचित् उक्तम् अपि शरीरमाद्यं खलु धर्मसाधनम्।

## प्रश्नाः

### 1. एकपदेन उत्तरत–

I. मानुषं जन्म कस्य साधनम् ?

II. केन मानवः धर्माचरणं कर्तुं शक्नोति ?

**2. पूर्णवाक्येन उत्तरत–**

I. मानवः कीदृशं शरीरम् एव अभिलष्यते ?
II. आत्मनः निवासस्थानं किम् ?

**3. निर्देशानुसारम् उत्तरत–**

I. 'इच्छा' इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?
II. 'मानवः' अस्य किं क्रियापदम् अत्र प्रयुक्तम् ?
III. 'मानव' स्वव्यक्तित्वानुरूपमेव निवासस्थानमिच्छति, अस्मिन् वाक्ये किम् अव्यय पदं प्रयुक्तम्?
IV. 'मानुषम्' अस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?

## गद्यांश 5

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एवं शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्त्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्य् भवति। व्यवहारे केचन दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

**प्रश्नाः**

**1. एकपदेन उत्तरत–**

I. लोकतन्त्रे केषां कल्याणं शासनस्य प्रमुखं कार्यं भवति ?
II. लोकतन्त्रे दोषान् दूरीकर्तुं किम् अनिवार्यम् अस्ति ?

**2. पूर्णवाक्येन उत्तरत–**

I. लोकतन्त्रे कस्य महत्त्वं प्रमुखम् ?
II. कां विना लोकतन्त्रं सुरक्षितं न भवति ?
III. गद्यांशस्य साराशं कुरुत।

**3. यथानिर्देशम् उत्तरत–**

I. 'प्रमुखं कार्यम्' इति पदयोः विशेषणपदं किम् ?
II. 'जनानां शासनं जनतन्त्रं कथ्यते' इति वाक्ये क्रियापदं किम् ?
III. 'जनतन्त्रम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?
IV. 'गुणानाम्' इति पदस्य किं विलोमपदम् अस्मिन् गद्यांशे प्रयुक्तम् ?
V. गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

––––0000––––

# अशुद्धि संशोधनम्

भाषा शिक्षण का मुख्य उद्देश्य छात्रों में श्रवण, पठन, लेखन व वाचन कौशल का विकास करना है। संस्कृत शिक्षण में अध्यापकों को छात्रों में संस्कृत भाषा के शुद्ध लेखन व उच्चारण पर विशेष ध्यान देना पड़ता है। इन्हीं त्रुटियों में सुधार हेतु अशुद्धि संशोधनम् नामक प्रकरण दिया जा रहा है। इसके माध्यम से पुरूष, कर्ता, क्रिया, लिंग, वचन, विशेषण एवं विभक्ति आदि में सम्भावित अशुद्धियों को उदाहरण एवं अभ्यास के द्वारा स्पष्ट करने का प्रयास किया गया है। इस प्रकरण का छात्रों को भली भॉति अभ्यास कराया जाए तो निश्चय ही छात्र संस्कृत में शुद्ध वाक्य लिखने में समर्थ हो सकेंगे तथा सम्भावित अशुद्धियों के निवारण करने की क्षमता विकसित होगी।

अशुद्धवाक्यम्—विद्यालये शताः छात्राः सन्ति।

शुद्धवाक्यम् — विद्यालये शतं छात्राः सन्ति। (शतं नित्यम् एक वचने)

अशुद्धवाक्यम् — भवान् कुत्र गच्छन्ति।

शुद्धवाक्यम् — भवान् कुत्र गच्छति। (भवान् एकवचने)

अशुद्धवाक्यम् — गुणवान् जनः प्रीतिपात्रः भवति।

शुद्धवाक्यम् — गुणवान् जनः प्रीतिपात्रम् भवति। (पात्रम् सर्वदा नपुंसकलिंगे)

अशुद्धवाक्यम् — अयं कन्या चतुरा अस्ति।

शुद्धवाक्यम् — इयं कन्या चतुरा अस्ति।(कन्या कारणात् इयम्)

अशुद्धवाक्यम् — पयः मधुरः अस्ति।

शुद्धवाक्यम् — पयः मधुरम् अस्ति।(पयः कारणात् नपुंसकलिंगे)

अशुद्धवाक्यम् — त्रयः बालकः पठति।

शुद्धवाक्यम् — त्रयः बालकाः पठन्ति। (त्रयः बहुवचने)

अशुद्धवाक्यम् — सुशीला पुस्तकं पठितवान्।

शुद्धवाक्य— सुशीला पुस्तकं पठितवती।(सुशीला—स्त्रीलिंगे)

अशुद्धवाक्यम्— इयं कन्या गुणवान् अस्ति।

शुद्धवाक्यम्— इयं कन्या गुणवती अस्ति। (कन्या स्त्रीलिंगे)

अशुद्धवाक्यम्— पितरौ पुत्रं पालयन्ति।

शुद्धवाक्यम्— पितरौ पुत्रं पालयतः। (क्रियापदं कर्तृपदस्य अनुसारेण)

अशुद्धवाक्यम्— वयं कुत्र गच्छन्ति।

शुद्धवाक्यम्— वयं कुत्र गच्छामः। (क्रियापदं कर्तृपदानुसारेण)

अशुद्धवाक्यम्— अहं ह्यः गमिष्यामि।

शुद्धवाक्यम्— अहं ह्यः अगच्छम। (ह्यः भूतकाले)

अशुद्धवाक्यम्— श्वः तौ तत्र न अगच्छताम्।

शुद्धवाक्यम्— श्वः तौ तत्र न गमिष्यतः।(श्वः लृट्लकारे)

अशुद्धवाक्यम्— वयं भारतीयाः अस्मि।

शुद्धवाक्यम्— वयं भारतीयाः स्मः।(क्रियापदं कर्तृपदानुसारेण)

अशुद्धवाक्यम्— सः पुष्पं दृष्टः।

शुद्धवाक्यम्— सः पुष्पं दृष्टवान्।(कर्तृवाच्ये क्तवतु)

अशुद्धवाक्यम्— सा जलं पिबिष्यति।

शुद्धवाक्यम्— सा जलं पास्यति।('पा' धातुलृट्लकारे—पास्यति)

अशुद्धवाक्यम्— एकदा एकः वृद्धा अपतत्।

शुद्धवाक्यम्— एकदा एका वृद्धा अपतत्। (विशेषणं विशेष्यानुसारम्)

अशुद्धवाक्यम्— ते मोहनस्य पुत्राणि सन्ति।

शुद्धवाक्यम्— ते मोहनस्य पुत्राः सन्ति।(पुत्राः पुल्लिङ्.गम्)

अशुद्धवाक्यम्— चत्वारः बालिकाः लिखन्ति।

शुद्धवाक्यम्— चतस्रः बालिकाः लिखन्ति। (विशेषणं विशेष्यानुसारम्)

अशुद्धवाक्यम्— यः श्रमं करोति सः सुखं लभति।

शुद्धवाक्यम्— यः श्रमं करोति सः सुखं लभते। ('लभ्' धातु आत्मनेपदम्)

अशुद्धवाक्यम्— वयं विद्यालये गच्छामः।

शुद्धवाक्यम्— वयं विद्यालयं गच्छामः। ('गम्' कारणात् द्वितीया)

अशुद्धवाक्यम्— सः चौरेण बिभेति।

शुद्धवाक्यम्— सः चौरात् बिभेति। ('भी' कारणात् पञ्चमी)

अशुद्धवाक्यम्— कविभ्यः कालिदासः श्रेष्ठः।

शुद्धवाक्यम्— कविषु कालिदासः श्रेष्ठः।(निर्धारण कारणात् षष्ठी)

# अभ्यासः

## अधोलिखितवाक्यानि शुद्धं कुरुत–

### 1. कर्तृक्रियासम्बन्धिन्यः अशुद्धयः

1. त्वं मम मित्रम् अस्ति।
2. भवान् किम् खादसि।
3. यत्र नार्यस्तु पूज्यन्ते रमति तत्र देवताः।
4. अहम् विद्यालयं पठति।
5. कृष्णः पुस्तकं ददति।
6. श्वः तौ तत्र न गमिष्यथः।
7. पुरा वीरवरो नाम राजा आसन्।
8. त्वम् अपि इदं पुस्तकं पठतु।

### 2. विशेषणसम्बन्ध्यः अशुद्धयः–

1. मनोहरं बालः गच्छति।
2. दीर्घः नदी वहति।
3. सर्वे फलानि मधुराणि सन्ति।
4. योग्यः मित्रं पठति।
5. तस्य कलत्रं सुन्दरी आसीत्।
6. तत् धेनुः कस्य अस्ति।

### 3. वाच्यसम्बन्ध्यः अशुद्धयः–

1. सः ग्रामं गम्यते।
2. रामेण निबन्धः लिखति।
3. तेन पुस्तकं पठति।
4. सा चित्रं दृष्टम्।
5. रामः रावणः उक्तवान्।

### 4. विभक्तिसम्बन्ध्यः अशुद्धयः –

1. शङ्करं नमः।
2. मार्गस्य उभयतः वृक्षाः सन्ति।
3. विद्युतस्य विना नगरेषु शून्यता भवति।
4. छात्राः गुरवे प्रश्नं पृच्छति।
5. सः सिंहेन बिभेति।
6. सः याचकः पादस्य पंगुः अस्ति।
7. त्वां भक्तिः कथं न रोचते।
8. पिता पुत्रीं स्निहयति।

————0000————

# पत्र लेखनम्

**अस्वास्थ्यकारणात् अवकाशार्थं प्रार्थना पत्रम्**

सेवायाम्,

श्रीमान् प्राचार्यमहोदयः
शासकीय उच्चतर–माध्यमिक–विद्यालयः
रायपुरम्, छत्तीसगढम्

**विषयः–** अवकाशाय प्रार्थनापत्रम्।

महोदय!

सविनयं निवेद्यते यत् अहं अतिदिवसात् ज्वरग्रस्तो अस्मि बलवती शिरोवेदना च मां व्यथयति। ज्वरकृततापेन कार्श्यम् उपगतो अस्मि। अतो अद्य विद्यालयम् आगन्तुम् असमर्थो अस्मि।

अतः कृपया 4.3.2016 दिनाVात् 7.3.2016 दिनाङ्कपर्यन्तं चतुर्–दिनानाम् अवकाशं स्वीकृत्य माम् अनुग्रहीष्यति।

दिनाङ्क : 03.03.2016

भवतः आज्ञाकारी शिष्यः
नाम – पङ्कजः तिवारी
कक्षा – दशमी
शा–उ–मा–विद्यालय–रायपुरम्,
छत्तीसगढम्

# ग्रामगमनार्थम् अवकाशाय प्रार्थना–पत्रम्

सेवायाम्

श्रीमान् प्राचार्यमहोदयः

शासः उच्चतर–माध्यमिक–विद्यालयः

रायगढम्, छत्तीसगढम्

**विषयः** अवकाशस्य हेतोः प्रार्थना–पत्रम्।

मान्वयर!

विनम्र निवेदनम् अस्ति यत् ज्येष्ठमासस्य पञ्चम्यां तिथौ मम मातुलस्य विवाहः सम्पत्स्यते। विवाहतिथेः एकदिन–पूर्वमेव मया तत्र प्राप्तव्यम्।

अतः 06.03.2016 दिनाVात् 08.03.2016 दिनाङ्कपर्यन्तं दिनत्रयस्य अवकाशं प्रदाय अनुगृह्णातु भवान् इति।

दिनाङ्क : 05.03.2016

भवतः आज्ञाकारिणी शिष्या

नाम – अपर्णा पटेलः

कक्षा – दशमी

शा–उ–मा–विद्यालय रायगढम्, छत्तीसगढम्

## स्थानान्तरणप्रमाणपत्रं प्राप्तुं प्राचार्यं प्रति प्रार्थनापत्रम्

प्रतिष्ठायाम्

श्रीमान् प्राचार्यः महोदयः

शासकीय उच्चतर–माध्यमिक–विद्यालयः

बिलासपुरम्, छत्तीसगढम्

**विषयः** – स्थानान्तरणप्रमाणपत्रं प्राप्तुम् आवेदनपत्रम्।

महानुभाव!

सविनयं निवेदनम् अस्ति यत् मम पिता छत्तीसगढस्य सर्वकारे एकः शिक्षकः अस्ति, तस्य स्थानान्तरणं बिलासपुरनगरात् बालोदनगरमभवत्। तस्मात् अहमपि बालोदनगरं गत्वा अध्ययनं कर्तुम् इच्छामि।

अतः अहं भवन्तं निवेदयामि यत् मह्यं स्थानान्तरणं प्रमाणपत्रं प्रदाय कृपां करोतु।

दिनाङ्क : .................

प्रार्थी

नाम – अभिषेकः सिदारः

कक्षा – दशमी

शा–उ–मा–विद्यालय–बिलासपुरनगरम्,

छत्तीसगढम्

# द्वितीया अंकसूची प्राप्त्यर्थं प्रार्थना–पत्रम्

सेवायाम्

श्रीमान् प्राचार्यः महोदयः

शासकीय–उच्चतर–माध्यमिक–विद्यालयः

अम्बिकापुरम्, छत्तीसगढम्

**विषयः–** द्वितीयां अंकसूचीं प्राप्तुं प्रार्थनापत्रम्।

महोदय!

सविनयं निवेदनम् अस्ति यद्यहं भवतः विद्यालये दशम्यां कक्षायां छात्रः अस्मि। त्रुटिवशात् नवम्याः कक्षायाः मम लब्धाङ्कपत्रं विलुप्तम् अभवत्। कृपया तस्य द्वितीयप्रतिं प्रदातुं कृपां करोतु भवान्।

**मम विवरणम् अधोलिखितम् अस्ति –**

(1) नाम – रमेशः मिश्रः

(2) कक्षा – नवमी

(3) परीक्षानुक्रमांकः 9545

(4) परीक्षा केन्द्रम् – शास–उच्च–माध्य–विद्यालय अम्बिकापुरम्

दिनाङ्क : ..................

भवतः विनीतः शिष्यः

नाम – रमेशः मिश्रः

कक्षा – दशमी

शा.उ.मा.विद्यालय–अम्बिकापुरम्

छत्तीसगढम्

# शुल्कक्षमापनार्थं प्राचार्यं प्रति पत्रम्

सेवायाम्

श्रीमान् प्राचार्य महोदय
शासकीय–उच्च–माध्यमिक–विद्यालयः
जगदलपुरम्, छत्तीसगढम्

**विषयः–** शुल्कमुक्तये प्रार्थना पत्रम्।

महोदय!

सविनयं निवेदनम् अस्ति यदहं भवतः विद्यालये दशमकक्षायाः छात्रा अस्मि। मम पिता एकः लिपिकः अस्ति। तस्य मासिकं वेतनं पञ्चसहस्ररूप्यकाणि मात्रमेव अस्ति। मम एकः भ्राता अष्टमकक्षायां भगिनी च पञ्चम्यां कक्षायां पठति। अस्माकं कुटुम्बस्य निर्वाहः अतीव काठिन्येन भवति।

अतः शुल्कक्षमापनार्थं प्रार्थयेऽहम्। आशासे अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य अनुग्रहीष्यति।

दिनाङ्क : .................

भवतः विनीता शिष्या
नाम – सुधा साहूः
कक्षा – दशमी
विद्यालय–शा.उच्च.माध्य.विद्यालयः,
जगदलपुरम्, छत्तीसगढम्

## पुस्तकं प्रेषणाय प्रकाशकं प्रति पत्रम्

सेवायाम्

श्रीमान् प्रबंधकः महोदयः

चौखम्बाप्रकाशनम् आगरा

**विषयः–** पुस्तकप्रेषणार्थं पत्रम्।

मान्यवर!

अहं दशम्याः कक्षायाः छात्रा अस्मि। भवता प्रकाशितम् ''अनुवाद रत्नाकरः'' नामकं पुस्तकं मया दृष्टम् तत्पुस्तकम् अहं क्रेतुम् इच्छामि। एतएव वी.पी.पी. द्वारा शीघ्रं प्रेषणीयम्।

धन्यवादः!

दिनाङ्क : .................

भवदीया

नाम – मनीषा चन्द्राकरः

कक्षा – दशमी

पत्रसङ्केतः शा.उच्च.माध्य.विद्यालयः,

कवर्धा, छत्तीसगढम्

## स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति पत्रम्

स्थानम् – जगदलपुरतः

दिनाङ्कः ..................

प्रियसखि सुमते!

नमस्ते!

अत्रकुशलं तत्रास्तु। भवत्याः पत्रं प्राप्तम्। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम विद्यालयः अतीव शोभनः अस्ति। मम विद्यालये विशालं क्रीडाक्षेत्रम्, समृद्धा प्रयोगशाला, सुन्दरः पुस्तकालयः च सन्ति। प्राचार्य–महोदयः अतीव कर्मठः व्यवहारशीलः चास्ति।

अस्माकं अध्यापकाः मनोयोगेन पाठयन्ति। सर्वे छात्राः अपि योग्याः सन्ति।

विस्तरेण पुनः लेखिष्यामि।

तव मित्रम्

नाम – सौम्यः भारद्वाजः

पत्र सङ्केतः – समताविहार, दन्तेवाडा नगरम्

छत्तीसगढम्

## अभ्यासः

1. भवान् बीजापुर नगरे स्थितः सिद्धार्थः सोमः। भवतः मित्रं आनन्दः कश्यपः कोरिया नगरे वसति। तं परीक्षायां सफलतायै वर्धापन–पत्रं। कोष्ठकप्रदत्तपदानां सहायतया लिखत। (अपश्यम्, महती, सिद्धार्थः, आगतः, छात्रवृतिम्, तुभ्यम्, अधिकतरा, आनन्द!, तत्रास्तु, बीजापुरनगरतः)

..................................................................................................................................................

स्थानम् ........................

दिनाङ्कः : 05.06.2016

प्रिय मित्र ..........

सप्रेम नमस्ते।

अत्रकुशलं ....................... । अद्यैव तव परिणामः ................................ । तव सफलतां ज्ञात्वा मम मनसि.................................प्रसन्नता जाता। मम एषा प्रसन्नता .......................... जाता यदा अहं तव नाम योग्यता–सूचौ................ । त्वया सप्त–शतम् अVाः प्राप्ताः। त्वं निश्चितरुपेण प्राप्स्यसि। त्वया परिवारस्य विद्यालयस्य च नाम उज्जवलीकृतम्।

अस्याम् उज्जवल सफलतायाम् अहं .................... हार्दिकं वर्धापनं यच्छामि उज्जवल–भविष्याय च कामये। मातृपितृचरणेषु प्रणामः।

तव अभिन्नहृदयं मित्रम्

.................................................

...............................................

**2. प्राचार्यं प्रति शुल्क–क्षमापनार्थं लिखितेऽस्मिन् प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त––पदानां साहाय्येन पूरयत्।**

सेवायाम्

प्राचार्य ........................

शास–उच्च–माध्य–विद्यालयः

जशपुरनगरम्, छत्तीसगढम्

**विषयः –** शुल्कक्षमापनार्थं प्रार्थनापत्रम्।

महोदय!

सविनयं निवेदनम् अस्ति यत् .......................पिता एकः चतुर्थश्रेणी ................. अस्ति। तस्य मासिक आयः अतीव ...................अस्ति। येन परिवारस्य ............................काठिन्येन भवति। मम परिवारे माता, पिता, द्वौ भ्रातरौ ...................... भगिनी च इति पञ्च ........................सन्ति। अतः अहं भवन्तं ..............यत् मम ....................... क्षमापयतु।

दिनांV : 07.08.2016

भवदीय : ........................

नाम – सोमनाथः

**मञ्जूषाः–अध्ययन–शुल्कं, न्यूनः, मम एका, शिष्यः, निवेदयामि, कर्मचारी, सदस्याः, निर्वाहः, महोदयः।**

––––0000––––

# निबन्ध

## (1) सदाचारः

1. सज्जनाः यानि–यानि सत्कार्याणि कुर्वन्ति, स सदाचारः उच्यते।
2. सदाचारी नरः कीर्तिं भूतिं च लभते।
3. प्रातः काले उत्थाय मातापितरौ, वृद्धान्, गुरून् च प्रणमेत्।
4. तेषाम् आज्ञां पालयेत्, तान् सेवेत च।
5. सदाचारिणः सर्वेषां प्राणिनामुपकारं करोति।
6. सदाचारेण मानवजीवनस्य सर्वविधा उन्नतिः भवति।
7. अतएव सदाचारः उन्नत्याः द्वारमस्ति।
8. सदाचारेणैव जनाः हितं मधुरं च वदन्ति।
9. सदाचार–युक्तो जनः सर्वत्र आदरं लभते।
10. सदाचारेण हीनो जनः सर्वत्र पशुतुल्यः भवति।
11. सदाचारपालनेन एव श्रीरामः मर्यादा पुरूषोत्तमोऽभवत्।
12. सदाचारेण एव महर्षिः दधीचिः गान्धि महोदयश्च यशः शरीरेण अद्यापि जीवितः।
13. सदाचारिणः सर्वत्र आदरं लभन्ते।
14. सदाचारस्य महिमानं वर्णयितुं कोऽपि न शक्नोति।
15. अतोऽस्माभिः सर्वतोभावेन सदाचारः पालनीयः।

## (2) सुभाषचन्द्रः

1. विश्वेऽस्मिन् स्वतन्त्रतासेनानी सुभाषस्य नाम को न जानाति।
2. सः क्रान्तिकारी नेता आसीत्।
3. अस्य जन्म बXप्रान्ते 1897 तमे जनवरी मासस्य 23 तारिकायाम् अभवत्।
4. अस्य पिता जानकीनाथ बोसः आसीत्।
5. बाल्यकालादेव बुद्धिमान धीरः साहसयुक्तः च आसीत्।
6. सः कालिकाता नगर्यां शिक्षां प्राप्तवान्।
7. सः असहयोगआन्दोलने संलग्नः अभवत्।
8. स्वातन्त्र्यार्थं प्रति सदा प्रयासरतः आसीत्।
9. सः शठेशाठ्यं समाचरेत् इति नीतिमनुसरितवान्।
10. 'आजाद हिन्द फौज' इत्याख्यां सेनां सङ्घटितवान्।
11. सः देशे हिन्दू–मुस्लिमयोः एकतायाः कृते फारवर्ड ब्लाक इत्यस्य स्थापना कृतवान्।
12. जर्मनी आकाशवाण्याः केन्द्रात् भारतीय जनेभ्यः स्वाधीनतायाः सन्देशं दत्तवान्।
13. सः आह्वानं अकरोत् – यूयं मह्यं रक्तमर्पयत अहं युष्मभ्यं स्वातन्त्र्यं दास्यामि।
14. भारतमातुः वीर–सपूतः आसीत्।
15. सः भारतीय जनानां प्रेरणा स्रोतः आसीत्।

## (3) होलिकोत्सवः

1. होलिकोत्सवः सर्वजनानां कृते प्रियः उत्सवः अस्ति।
2. अयमुत्सवः भारतस्य प्रसिद्धः उत्सवः अस्ति।
3. पुरा हिरण्यकशिपुः नाम राजा अभवत्।
4. तस्य पुत्रः प्रह्लादः ईश्वरभक्तः अभवत्।
5. हिरण्यकशिपुः स्वपुत्रं मारयितुम् अयतत।
6. परन्तु प्रहलादः ईश्वर प्रसादेन सुरक्षितः आसीत्।
7. हिरण्यकशिपुः स्वभगिनीं होलिकां प्रह्लादस्य वधस्यकृते न्ययोजयत्।
8. अग्नौ होलिका तु भस्मसात् अभवत् परं प्रहलादः सुरक्षित आसीत्।
9. अन्ते च भगवान् नृसिंहः हिरण्यकशिपुम् अमारयत्।
10. होलिका दहनमुद्दिश्य होलिकोत्सवः प्रारभत।
11. अयमुत्सवः फाल्गुनमासस्य पूर्णिमायां मन्यते।
12. होलिकात्सवे जनाः परस्परं रङ्गरञ्जितं जलं प्रक्षिपन्ति।
13. जनाः उत्सवावसरे नृत्यन्ति गायन्ति च।
14. आबालवृद्धाः हास्यव्यंग्य संलापान् कुर्वन्ति।
15. अतः इदं पर्व मानवानां कृते अद्वितीयम् उपहारमस्ति।

## (4) बीटा (क्रिकेट)

1. जीवने क्रीडायाः विशिष्टं स्थानम् अस्ति।
2. यथा जीवने भोजनम् आवश्यकं भवति तथैव क्रीडापि आवश्यकी अस्ति।
3. क्रीडासु बीटाकीडा प्रमुख महत्वपूर्णा चास्ति।
4. वर्तमाने बीटाक्रीडा विश्वस्य लोकप्रिया क्रीडा अस्ति।
5. बीटा क्रीडा प्रतियोगिता विश्वस्तरीया भवति।
6. बीटा क्रीडायाः जन्म आंग्लदेशे मन्यते।
7. बीटा महार्ह क्रीडा अस्ति।
8. बीटायाः प्राX.णम् अति विशालं भवति।
9. बीटा प्राX.णे त्रयः स्टम्पाः (दण्डाः) एकं कन्दुकं भवति।
10. बीटा क्रीडायाः कीडकानां द्वे दले भवतः।
11. प्रत्येके दले एकादशः क्रीडकाः भवन्ति।
12. यः समूहः अधिकान् धावनाङ्कान् प्राप्नोति सः विजयी भवति।
13. निर्णायकस्य निर्णयं सर्वे क्रीडकाः मन्यन्ते।
14. विजयी क्रीडकेभ्यः पुरस्कारः दीयते।
15. क्रीडया विश्वबन्धुत्वं संवर्धते।

## (5) महाकविः कालिदासः

1. महाकविकालिदास्य नाम अस्मिन् जगति को न जानाति।
2. इंग्लैण्डवासिनः तं शेक्सपीयर तुल्यं कथयन्ति।

3. कालिदासः विश्वस्य श्रेष्ठतमः कविः आसीत्।
4. सः कविकुलगुरुः कथ्यते।
5. सः महाराजस्य विक्रमादित्यस्य नवरत्नेषु एकः आसीत्।
6. अस्य विवाहः विद्योत्तमा नाम राजकन्यया सह अभवत्।
7. कालिदासेन रचिताः सप्तग्रन्थाः प्रसिद्धाः।
8. रघुवंशं कुमारसंभवं च द्वे महाकाव्ये स्तः।
9. त्रीणि नाटकानि मालविकाग्निमित्रम् विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलञ्च सन्ति।
10. द्वे खण्डकाव्येऽपि स्तः ऋतुसंहारं मेघदूतम् च।
11. शकुन्तलानाटकम् अनेकासु भाषासु अनूदितम्।
12. सर्वाः ग्रन्थाः अत्यन्ताः सरसाः सन्ति।
13. तस्य 'उपमा कालिदासस्य' इति उक्तिः प्रसिद्धा।
14. कालिदासः रससिद्धः कविरस्ति।
15. सत्यमेव कविरयं में परमप्रियः कविः अस्ति।

## (6) मम प्रदेशः (छत्तीसगढः)

1. मम प्रदेशः छत्तीसगढः अस्ति।
2. छत्तीसगढ प्रदेशः 2000 तमे खीष्टाब्दे नवम्बर–मासस्य प्रथमदिनाङ्क सुघटितः।
3. भारतवर्षस्य मध्य दक्षिण भागे छत्तीसगढ प्रदेशः विराजते।
4. अस्मिन् प्रदेशे प्रभूतमन्नमुत्पन्नं भवति।
5. अतः छत्तीसगढप्रदेशः ' धान का कटोरा' इति उच्यते।
6. छत्तीसगढ़ प्रदेशः अरण्यानां प्रदेशोऽस्ति।
7. वनेभ्यः वयं काष्ठानि–फलानि–औषधयः च प्राप्नुमः।
8. वनेषु खगाः मृगाः व्याघ्राः च निवसन्ति।
9. छत्तीसगढप्रदेशस्य, प्रमुखासु नदीषु महानदी, शिवनाथ, हसदो, ईब, पैरी, केलो, उदन्ती, प्रभृतयः सन्ति।
10. छत्तीसगढप्रदेशस्य राजधानी रायपुरनगरम् अस्ति।
11. राजिमनगरं छत्तीसगढस्य प्रयागरुपेण शोभते।
12. कवर्धा क्षेत्रे भोरमदेवः छत्तीसगढ़स्य खजुराहो नाम्ना विख्यातः तथा च सिरपुरं छत्तीसगढस्य काशी इति अभिधीयते।
13. प्रदेशस्य बस्तरक्षेत्रे आदिवासिजनानां बाहुल्यमस्ति।
14. इस्पात–नगरी–भिलाई इति नगरं लौहादयः खनिजोद्योगानां कृते प्रसिद्धम्।
15. छत्तीसगढस्य लोकसंस्कृतिः अतीव समृद्धा।

## (7) पर्यावरणम्

1. वयं वायुजलमृदाभिः आवृते वातावरणे निवसामः।
2. एतदेव वातावरणं पर्यावरण कथ्यते।
3. पर्यावरणेनैव वयं जीवनोपयोगिवस्तुनि प्राप्नुमः।
4. जलं वायुः च जीवने महत्त्वपूर्णौ स्तः।
5. साम्प्रतं शुद्ध–पेय–जलस्य समस्या वर्तते।
6. अधुना वायुरपि शुद्धं नास्ति।

7. एवमेव प्रदूषित–पर्यावरणेन विविधाः रोगाः जायन्ते।
8. पर्यावरणस्य रक्षायाः अति आवश्यकता वर्तते।
9. प्रदूषणस्य अनेकानि कारणानि सन्ति।
10. औद्योगिकापशिष्ट –पदार्थ–उच्च–ध्वनि–यानधूम्रादयः प्रमुखानि कारणानि सन्ति।
11. पर्यावरणरक्षायै वृक्षाः रोपणीयाः।
12. वयं नदीषु तडागेषु च दूषितं जलं न पतेम्।
13. तैल–रहितवाहनानां प्रयोगः करणीयः।
14. जनाः तरुणां रोपणम् अभिरक्षणं च कुर्युः।

## (8) ग्राम्य जीवनम्

1. भारतवर्षः ग्रामप्रधानः देशः अस्ति।
2. अधिकाः जनाः ग्रामे एव निवसन्ति।
3. ग्राम्यजीवनं सुव्यवस्थितं भवति।
4. ग्रामाणां जलवायुः स्वास्थ्यप्रदः भवति।
5. ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति।
6. ग्रामे प्रायेण कृषीवलाः भवन्ति।
7. ग्रामान् परितः शस्यश्यामला धरित्री राजते।
8. परिश्रमशीलाः ग्रामीणाः धान्यादिकम् उत्पादयन्ति।
9. ग्रामे शुक–हंस–मयूर– कोकिलादयः पक्षिणः कूजन्ति।
10. हरिण–गो–महिष–मेषादयः पशवः च चरन्ति।
11. ग्राम्य–जीवनं सदाचार सम्पन्नं धार्मिकं च भवति।
12. ग्राम्य–जीवनं सुकरं सुखकरं च भवति।

## (9) मम दिनचर्या

1. अहं प्रातः काले उत्तिष्ठामि।
2. ईश्वरं स्मरामि।
3. मातरं पितरं च नमामि।
4. दन्तधावनं कृत्वा मुख–प्रक्षालनं करोमि।
5. पश्चात् अध्ययनं करोमि।
6. प्रतिदिनं भ्रमणाय उद्यानं गच्छामि।
7. तत्र योगं व्यायामं च करोमि।
8. ततः गृहं आगत्य स्नानं करोमि।
9. भोजनं कृत्वा विद्यालयं गच्छामि।
10. तत्र शिक्षकान् प्रणमामि।
11. विद्यालये विविध–विषयानां अध्ययनं करोमि।
12. अवकाशानन्तरं गृहं प्रति आगच्छामि।
13. क्रीडाङ्गणे मित्रैः सह खेलामि।
14. गृहं प्रति निवृत्य हस्तौ पादौ च प्रक्षाल्य भोजनं करोमि।
15. अध्ययनं गृहकार्यं च कृत्वा शयनं करोमि।

R628EM

––––0000––––